आगमोद्धारक—ग्रन्थमालायाः चतुर्दशं रत्नम्

णमोत्थु णं समणस्स भगवओ महावीरस्स

# आगमोद्धारक—कृतिसन्दोहस्य

## तृतीयो–विभागः

मुनि श्री ...सागरजी

P. 10815
22/03/99

Serving JinShasan
078978
gyanmandir@kobatirth.org

मुनि श्री ...सागरजी

मूल्यम् रु. १=००

प्रकाशक

रमणलाल जयचन्द शाह

ठे. शेठ मीठाभाई कल्याणचन्दनी पेढी

कपडवंज (जि. खेडा)

संशोधकः–

परमपूज्य आगमोद्धारक आचार्यप्रवर

श्री आनन्दसागरसूरिपुङ्गवपट्टधरः-

आचार्य श्रीमन्माणिक्यसागरसूरिः

आ. श्रीकैलाससागरसूरि ज्ञानमन्दिर
श्रीमहावीर जैन आराधना केन्द्र
कोबा (गांधीनगर) पि. ३८२००९

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मुद्रणस्थानः—कळा विजय प्रिन्टींग प्रेस
मु. इदगाह, पो. कतारगाम, जि, सुरत.

—: प्राप्तिस्थानो :—

(१) श्री जैनानन्द पुस्तकालय
गोपीपुरा सुरत W. R.

(२) श्री सरस्वती पुस्तकभण्डार
हाथीखाना रतनपोल अमदावाद

(३) शाह वाडीलाल गोरधनदास
महात्मा गांधीरोड वडोदरा

श्रीकैलाससागरसूरि ज्ञानमन्दिर
श्रीम[illegible]ीर [illegible]न [illegible] केन्द्र
कोबा, [illegible]

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ॐ नमो जिनाय

# यतिधर्मोपदेशः [१]

भो भव्या! निजरूपधाम रुचिरं जन्मादिदुःखोज्झितम् , शश्वज्ज्ञानसुखादिपूर्णममलं प्राप्तुं शिवं चेन्मनः । तत्क्षान्त्यादिमुखेऽत्र धर्मदशके शुद्धं विधत्तोद्यममित्येवं जिनराज आप्तविमलज्ञानो जगौ पर्षदः ॥१॥ धर्मं करोति यो देही, क्षान्त्यादिदशरूपकम् । न स भ्राम्यति लोकेऽत्र, रज्जूसप्तद्विकोन्मिते ॥२॥ धर्मं दशविधं नैनं, चकारेति गतादिकात् । कालादनन्तानावर्त्तान्, भ्रान्तो जन्मान्तकाकुलान् ॥३॥ धर्मेच्छा दुर्लभा लोके, कामक्रोधादिसङ्कुले । तत्रात्महितकृद्धर्म-माप्नोति मितजन्मरुक् ॥४॥ स्वप्नेऽपि न स्पृशन्त्येन-मनार्याः कुत्सितान्तराः । आर्यक्षेत्रभवाः केचिन्, नरा अपि तथाविधाः ॥५॥ आर्यक्षेत्रे कुले शुद्धे, शुद्धजातौ समुद्भवे । आबाल्याज्जायते धर्मे, मतिः स्वकुलधर्मगा ॥६॥ तत्र चेच्छुद्धधर्माढ्येऽङ्गिनो जन्म कुले भवेद् । आबाल्याच्छुद्धधर्मेण, रक्तमान्तरमश्नुते ॥७॥ अल्पान्येव जगत्यत्र, धर्मभाञ्जि कुलानि च । जाते परत्र धर्मातिर्दुर्लभाब्धौ मणेर्यथा ॥८॥ लब्धे धर्मेऽपि सामग्र्या, स्वाख्याता दुर्लभो जिनः । ततः श्राद्धकुले जाताः, स्युर्धर्मेण न संयुताः ॥९॥ अप्राप्य धर्मस्वाख्यातॄनलब्ध्वा बोधिसम्भवं । जन्तुः कर्मभराक्रान्तो, विश्वे विश्वेऽत्र भ्राम्यति ॥१०॥ लब्ध्वा बोधिं स एवाङ्गी, स्वाख्यातं धर्ममाप्नुयात् । लोके भ्राम्यन् समग्रेऽस्मिन्, योऽनल्पं कर्म निर्जरेत् ॥११॥ यद्यप्यनल्पबन्ध्येव, पापमण्वेव निर्जरेत् । धर्मश्रुतिं विना देही, चित्रमेष बहुक्षयः ॥१२॥ अकामा निर्जरा यावद्ग्रन्थिदेशसमागमम् । यत्रैका कोटिरब्धीनां, शेषानैवावतिष्ठति ॥१३॥ यथाऽन्त्या वस्त्रसंशुद्धिर्यथाऽन्त्यो वा गदक्षयः । यत्नसाध्यस्तथैषाऽत्र, शेषा कोट्यपि दुःक्षया ॥१४॥ ज्ञानदर्शनचारित्रैः, क्षयस्तस्याः क्रमाद्धमी । गुणा मार्गस्थधामानस्तत्त्रय्यां साधना हिता ॥१५॥ स एव निर्जरां बह्वी-माश्चर्येणापि साधयेत् । स्वभावात् संवृणोत्यङ्गी, हेतून् मिथ्यात्वभाविनः ॥१६॥ तथाभव्यत्वपाकेन, जीवे भावो भवेत्तथा । आयान्त्यनादितो येन पापानि निरुणद्धि सः ॥१७॥ अन्यथा ग्रन्थिदेशं स, प्राप्नुयान्नैव पूर्ववत् । ततो युक्तं महाबन्ध-हेतून् ॥१॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

संवृणुते तदा ॥ १८ ॥ न चेत् संवरमारोहेत्, कर्माणि प्रागिवाश्रवेत् । कर्मणामाश्रवे यस्मान्मिथ्यात्वाद्या बलान्विताः ॥ १९ ॥ आश्रुतं बध्यते कर्म, मिथ्यात्वादिभिरङ्गिना । विधाय विविधान् भेदान्, रसं कालं च तद्गतम् ॥ २० ॥ तत्संवरेण हीनो तु, ग्रन्थिदेशं न गच्छति । अनाद्याश्रवनिष्ठः स, पापानि सञ्चिनोत्यलम् ॥ २१ ॥ आश्रवाः कायमूला यन्न वागाद्यशरीरके । सर्वेषां देहिनामक्षा-द्या भवन्ति शरीरजाः ॥ २२ ॥ मरणाङ्कगतोऽप्यङ्गी, ध्रुवं त्याज्ये तनौ निजे । ममत्वं तद्विधं धत्ते, नैवं प्राक् न परेष्वपि ॥ २३ ॥ तत्पुष्ट्यै सकलं जन्मा-श्रवसंस्थितजीवनः । न च दुर्जनवद्देहः, पुष्टोऽप्येति पदं परम् ॥ २४ ॥ निष्पाद्योऽयमशुद्धानां, सञ्चयेन पुरः पुनः । तद्विधेनैव पोष्योऽयं, भृतस्तेनैव तिष्ठति ॥ २५ ॥ सक्तो देहे धने बन्धावपत्ये विषयेष्वपि । रज्यते संग एको हि, सृजति स्वां परम्पराम् ॥ २६ ॥ सर्वेभ्यो नैनमात्मानं, भिन्नं वेत्ति स सङ्गभाक् । विपर्यस्तेऽक्षिणि भ्रष्टं, स्वरूपात् किं न दृश्यते ? ॥ २७ ॥ वेत्ति नैको जायतेऽङ्गी, म्रियते ह्येक एव च । एकः पापानि कुरुतेऽत्रामुत्राप्येक आर्त्तिभाक् ॥ २८ ॥ मितो भवोऽङ्गिनां न्यक्षं, साद्यन्तो भवभाविनां । आत्मद्रव्यमनुत्पन्नं, संसारे भ्रमति स्फुटम् ॥ २९ ॥ भवे भवे पृथग् मुक्ता, देहाः पितर आर्यकाः । भार्या पुत्राः सहैकोऽपि, जीवं नैति भवान्तरे ॥ ३० ॥ संसारे मीलितं सर्वं, बह्वायासेन चार्जितं । तत् सर्वं परिहर्त्तव्यं, क्षणेनैकेन सर्वथा ॥ ३१ ॥ यद्यत्कर्मार्जितं भोगो-पभोगादिसमर्थने । प्रेत्य तत्तेन भोक्तव्यं, धनं तस्य तु पश्चिमैः ॥ ३२ ॥ एवं प्रतिभवं चिन्वन्, कर्म तत्फलमाप्नुवन् । विरज्यते न संसारी, तेनात्मध्रुक् परो नहि ॥ ३३ ॥ भवे च मन्यते स्वीयान्, यानर्थान् पितृबान्धवान् । स्त्रियः पुत्रांश्च ते सर्वे, दूरस्था मरणागमे ॥ ३४ ॥ नार्था भवन्ति त्राणाय, न कुटुम्बं न सद्धृदः । सुरैरप्रतिकार्ये च, जन्मव्याधिजरान्तके ॥ ३५ ॥ अर्थाश्रिताः स्त्रियो व्यूढा, समं पातं कुटुम्बकम् । स्निग्धाश्च सुहृदः सर्वे, शरणं न यमागतौ ॥ ३६ ॥ अनित्ये कतिचिद् घस्र-मासवर्षयुगान्तिके । मुग्धस्तनुकुटुम्बार्थे, जीवितेऽपि च चञ्चले ॥ ३७ ॥ अनित्यमायुरारोग्यं, यौवनं बलमृद्धयः । सर्वं चलं तु संसारे, मोहात् तदपि मुह्यते ॥ ३८ ॥ हेतवः पञ्च जगति, कार्यराशौ समुदिताः । जीवाजीवाश्रिते नैकः स्वतन्त्रः कार्यसाधकः ॥ ३९ ॥ कालस्वभावनियति-कर्मयत्नाश्च ते पुनः । तत्र स्वभावतो भव्ये, कालाच्चान्यथावृत्तिं गते ॥ ४० ॥ प्राप्येऽवश्यंतया धर्मे, कर्मण्यल्पत्वमागते । ग्रन्थिं गते प्रयत्नः स्यात्, सो[illegible]द्धिडन्वकः ॥ ४१ ॥ एवंविधे तु जीवे स्याच्छिथिला मोहजा दशा । जातायां च श्लथायां



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आगमोद्धारक-कृति-सन्दोहे ॥३॥

यतिधर्मोपदेशः

स्यात्तस्यां जीवे विवेकिता ॥४२॥ धनं वपुर्बलं धाम, यौवनं चपलं समं । संसारे नित्यमेकं तु, शिवं वेत्ति विवेकतः ॥४३॥ विवेक्येव विनक्त्येतत्, त्राणं किञ्चिन्न विश्वगम् । धर्मो हि त्राणमार्त्तानां, परिणामात्ययावनात् ॥४४॥ प्रेत्याङ्गी यात्यवशः सन्, पुण्यपापप्रणोदितः । प्रागुपात्तान् विहाय स्वान्, एकाक्येवासहायकः ॥४५॥ यद् दृश्यं विश्वगं सर्वं, तद्धेयं यत् पृथग्भवम् । सार्धं स्वरूपमेत्येवात्मनो ज्ञानादि नापरम् ॥४६॥ प्रेत्येह प्राग्भवेष्वङ्गी, कायकारालये स्थितः । सर्वेषां मोहहेतूनां, देहो मूर्धन्यतां गतः ॥४७॥ आरभ्यतेऽयमारम्भे, भवस्यान्ते च मुच्यते । आद्यान्ताशुचिरूपश्च, कोऽत्र देहे ममत्वभाक् ॥४८॥ एवं मोहमले क्षीणे, जायते शुद्धभावनः । चेतनः स रुणद्ध्याशु, क्रोधादीनाश्रवान् लघु ॥४९॥ क्रुध्येन्माद्येद्वञ्चयेन्न, न लुभ्येच्च विवेकवान् । न लिम्पेदार्त्तरौद्राभ्यां, जीवं न दूषयेद् गुणान् ॥५०॥ एवं चापूर्वकरणं, यियासुर्न घनं मलम् । आश्रवेत् संवरेच्चाशु, रागद्वेषाल्पभावतः ॥५१॥ आयान्तं चिक्कणाद्भावाद्, रागद्वेषोद्भवात् पुरा । निरुणद्धि महामोहं, सानुमारुतवेगवत् ॥६२॥ भाविभद्रो विवेक्येवं, संवृण्वन्नाश्रवान् परान् । निर्जरां कुरुते यस्मान्निर्जरा संवृतेर्बलम् ॥५३॥ विभागे च पदार्थानां, तत्त्वाद् द्वे एव सुन्दरे । जीवाजीवावेव तत्त्वे, नाभ्यां भिन्नं जगत्यपि ॥५४॥ परं द्वेष्टा यदि न स्याद्धेयादेयार्थदेशनः । देशनायाः फलं श्रोता, किं लभेतात्मयत्नतः ? ॥५५॥ स हिती देशको यः स्याद्धेयादेयार्थबोधकः । येन स्यान्निखिला चेष्टा, विघ्नहीनेष्टसाधिनी ॥५६॥ आदेयस्तत्त्वतो मोक्षो, जन्ममृत्यादिवर्जितः । शश्वज्ज्ञानसुखालीढः, कर्मलेपोऽपि यत्र न ॥५७॥ निर्जरा संवरश्चास्य, साधकौ, बाधकौ पुनः । बन्धाश्रवौ ततस्तत्त्व-सप्तके जिनगीः परा ॥५८॥ पुण्यपापे शुभाशुभ-कर्मणी साधने परे । ग्रन्थिस्थोऽङ्गी ततो गाढ-कर्मनिर्जरणे व्रजेत् ॥५९॥ अभोगो नापि कोप्यङ्गी, भोगो नोदयमन्तरा । कर्मणां भोगतो नाशोऽतो नानिर्जरकोऽसुमान् ॥६०॥ अबोधान्मोक्षतत्त्वस्यापेक्षन्ते नहि निर्जराम् । दुःखवेदाद् भवेद्या सा, निर्जराऽकामिकाऽसुषु ॥६१॥ मोक्षमन्यादृशं मत्वा, निर्जरां चान्यथाविधाम् । सावद्यबहुलोपायैर्या च साऽकामनिर्जरा ॥६२॥ शकानां पितृशुद्धिर्याऽऽभीराणां मन्थनिकया । अग्निजलादिपाताद्यैर्याऽपि साऽकामनिर्जरा ॥६३॥ परिव्राट्तापसाऽऽजीवादिकाः प्रेत्यविराधकाः । अकामनिर्जरावन्तः, सकामाऽऽराधकेऽङ्गिनि ॥६४॥ स ग्रन्थेः पुरतो गच्छन्नपूर्वकरणं व्रजेत् । तत्र तां निर्जरां कुर्याद्, या न पूर्वं भवोदधौ ॥६५॥ एवं निर्जीय कर्माणि, यदा सम्यक्त्वम-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुते । विश्वविश्वे न स भ्राम्येत् , सबोधिकुलमेति च ॥६६॥ कुले बोधियुते जाते, श्रुतिः स्वाख्यातधर्मिणी ।
दुर्लभाऽतोऽधुना भव्या, घनं सिद्धं परं त्वणु ॥ ६७ ॥ परं प्रान्तो यथा मन्त्र-सिद्धेः कष्टतरो भवेत् । धर्मोऽतो
भवतां मोक्षा-सन्नो दुष्करतां व्रजेत् ॥ ६८ ॥ देशसर्वाघविरतेर्धर्मो भेदद्वयात्मकः । साभिष्वङ्गारतन्वते यं, देश-
तोऽसौ न मुक्तये ॥ ६९ ॥ पारम्पर्येण सोऽप्येति, सर्वं निस्सङ्गताभिधम् । धर्मं तदेवं मुक्त्यर्हं, निस्सङ्गं वृणु-
तादरात् ॥ ७० ॥ दशधाऽयं क्षमामार्दवार्जवालुब्धतान्वितः । सत्यशौचतपस्त्याग-संयमब्रह्मचर्यगः ॥ ७१ ॥ अप-
राधिष्वपि क्रुध्येन्न विदन् कर्मबन्धनं । कृतागाः क्षामयेदागो, यथा तस्य न पापिता ॥ ७२ ॥ क्रुद्धः स्याच्चित्त-
सन्तापी, परापकृतिकर्मठः । उपकारं कृतं हन्याद्, गतः प्रेत्यापि युध्यते ॥ ७३ ॥ क्रोधदावे क्षमामेघः, पुष्करावर्त-
सञ्ज्ञकः । तस्मात्तामाश्रयेत् सद्यो, यः स्यादात्मवशंवदः ॥ ७४ ॥ भयङ्करो ज्वरः क्रोधो, यदस्माल्लोहितं वपुः ।
वक्त्रोष्ठे स्फुरणं शोषो, गले त्रोटिश्च श्रोणिगः ॥ ७५ ॥ किञ्च न स्मृतिसम्पाद्योऽन्योऽयं क्रोधस्तथा भवेत् ।
आत्मशोषित्वमुद्वीक्ष्य, बुधः संवृणुते लघु ॥ ७६ ॥ मासाद्युपवासवद्भ्योऽपि, घटकूरभुजो मुनेः । सुरार्चनं के-
वलं च, प्राक् श्रुत्वा संश्रयेत् क्षमाम् ॥ ७७ ॥ क्रोधनोऽहिर्महावीरं, त्रिर्दशन् जिनवाक्यतः । क्षमी गोपालघातानां,
सोढा द्यामष्टमं ययौ ॥ ७८ ॥ क्रोधी नेक्षेत स्वं दोषं, देशकाय प्रकुप्यति । दोषपूर्णः कथमात्मा, दोषनाशी च
सद्गुणः ॥ ७९ ॥ प्रतिक्रान्तेः फलं दोष-शोषो यद्यपि गीयते । अब्दान्तः शेषयेत् क्रोधं, न चेन्निस्सार्यते गणात्
॥ ८० ॥ परद्रोहपरः क्रोधः, क्रोधो गुणदवानलः । आदौ निरस्य यत्क्रोधं, सर्वा प्राप्या गुणावलिः ॥ ८१ ॥ क्रोधो
दुष्टो विनाश्येत, क्रुद्धोऽहमिति बोधतः । सुकरं तं न कुर्वीत, स कुर्यात् किं परं हितम् ? ॥ ८२ ॥ क्रुद्धो देवं गु-
रुं धर्म-मात्मानं नाशयेत् क्षणात् । गोशालेन न किं मुक्ता ? वीरदाहाय तैजसी ? ॥ ८३ ॥ उपशान्तिप्रभावेना-
शुद्ध्यदर्जुनमालिकः । स्त्रीसप्तमान् जनान्योऽहन् , प्रतिघस्रं सदैवतः ॥८४॥ तत्त्वबुद्धिमतत्त्वेषु , तनुयात्तत्त्वरोषतः ।
सर्वज्ञं वीतरागं किं, न निन्देज्जैनरोषतः ? ॥ ८५ ॥ क्रोधाद्वैरं ततोऽप्रीतिजावं प्रेत्यानुवर्तते । न युध्येते किमु श्वभ्र,
गतौ लक्ष्मणरावणौ ? ॥ ८६ ॥ सिंहो हतस्त्रिपृष्ठेन, वीरभावे गुणाकरे । सुदंष्ट्रो हलिकः शर्मा द्वेषाविष्टास्त्रयो न
किम् ? ॥ ८७ ॥ गौतमादात्तदीक्षः सन् , वीरे भक्तिं समुद्वहन् । दृष्ट्वा वीरं गृही जातोऽङ्गी किं क्रोधात्करोति न ?
॥ ८८ ॥ वासुदेवभवे राज्ञी, क्रुद्धा स्वस्याभिमानतः । व्यन्तरीभूय सा किं नो-पससर्ज जिनं प्रभुम् ॥ ८९ ॥ ? क्र-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तापराधः कमठो, देवत्वे कर्मठो भवन् । क्षमाधरं श्रीपार्श्वं नो -पससर्ज क्रुधोद्धुरः ? ॥ ९० ॥ क्रोधोत्थाप्रीतिशान्त्यर्थं, सर्वदेवनमस्क्रिया । वर्ण्या मताऽन्यथावादी, भवसागरगामुकः ॥ ९१ ॥ अगारिक्रोधशान्त्यर्थं, कुर्याद् गच्छाद्बहिर्गणी । मुनिं मायां प्रयुज्यापि, यत् क्रोधो धर्मबाधनः ॥ ९२ ॥ क्रोधवैरविघातेन, दृष्ट्वाऽर्चामर्हदादिगाम् । स्तुवन्ति शासनं लोका, हेतुरर्हः समुन्नतौ ॥ ९३ ॥ जैने धर्मे शमं सारं, क्षाम्यन्त्विवतीर्यते ततः । शाम्येद्योऽसौ भवेद्धर्मी, क्वचिद्धर्मो द्वयोरपि ॥ ९४ ॥ क्षन्तव्यं क्षामयेच्चान्यं, क्रोधवैरप्रशान्तये । भूयोभूय इति प्रोक्तं, कल्पे पर्युषणाभिधे ॥ ९५ ॥ अन्वेषते स्वभावं स, यः स्याच्छान्तिमहोदधौ । मग्न इत्युच्यते भूरिकृत्वो जैनैः क्षमापनम् ॥ ९६ ॥ वैरान्वितो यथा स्कन्धोऽमीचिर्धर्मविराधकः । भीतश्चेत्तं ततो धेहि, क्रोधवैरोज्झितं मनः ॥ ९७ ॥ कृषौ चित्रे यथा भूमेः, शुद्धिरावश्यिकी मता । धर्मे गुणे तथा चेतः-शुद्धिरित्थं विचार्यताम् ॥ ९८ ॥ धान्यक्षेपो यथा शुद्धे, तले निष्कोपजन्तुषु । गुणबीजानि रोप्यन्ते, विनयाहतमानसैः ॥ ९९ ॥ ये देवा गुरवो धर्माः, शापभापितविष्टपाः । वन्ध्या गुणैश्च धर्मैश्च, धर्मिभिर्येर्ज्यतां गताः ॥ १०० ॥ लोके लोकोत्तरे मार्गे, शिक्षासम्भविनो गुणा । ग्रहणासेवने शिक्षे, लभ्ये नाविनयैर्नरैः ॥ १०१ ॥ यथाङ्कुशं गजो मत्तो, मेंठं वर्त्म च नो गणेत् । मानमत्तोऽसुमानेवं, धर्मान् देवान् गुरूंस्तथा ॥ १०२ ॥ जातिलाभकुलैश्वर्यश्रुतरूपबलैर्निजम् । प्रेक्षमाणोऽधिकं नम्रो, न परे तद्गुणाः कुतः ॥ १०३ ॥ आधातुं निश्चयं सोऽलं, कर्तव्यस्य भवेत् क्षमः । यः साध्यस्य गुणाढ्यत्वं, निर्दोषत्वं च साधितुम् ॥ १०४ ॥ नाविनीतस्य शिक्षा स्याद्, गुणदोषमतिर्न ताम् । विना, विनयहीनस्तन्नाधातुं निश्चयं,क्षमः ॥१०५॥ न श्रेयान्निश्चयोऽज्ञस्यानिश्चिते न शुभा क्रिया । आदाय विनयी शिक्षां, निश्चयात् साधयेद्धितम् ॥ १०६ ॥ संशयी हन्यते विघ्नैर्हन्ति तान्निश्चयी दृढान् । मत्वेति प्रथमं कार्यः, सकर्णैः कार्यनिश्चयः ॥ १०७ ॥ साध्यनिश्चयवान् हेतू-नवश्यं साध्यसाधकान् । अन्वेषते च सुतस्य, मुखे ह्योतोर्न मूषकाः ॥ १०८ ॥ उपायानामपि ज्ञानं, नान्तरा शिक्षकान् भवेत् । तदुपायविबोधार्थं,तज्ज्ञान्नम्रः समाश्रयेत् ॥ १०९ ॥ हेतुज्ञानं भवेत्कार्ये, हेतूनां व्यापृतिर्यदि । शून्याऽऽसेवनया सा स्यात्, केकिनृत्यमिवाफला ॥ ११०॥ तज्ज्ञसेवोद्भवोऽभ्यासो, भवेदासेवनागतः । समुपासीत विनयी, तज्ज्ञान्मानं विहाय तु ॥ १११ ॥ निश्चयज्ञानकार्याणि, समेति विनयी नरः । अविनीतो नरोऽरण्य-महिष इव दुर्जनैः ॥ ११२ ॥ लोकोत्तरेऽध्वनि प्राप्या, गुरो रत्नत्रयी पुनः । प्रायो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञानावृतेर्जन्तुर्नाश्रुत्वा पुण्यपापवित् ॥ ११३ ॥ स्वयम्बुद्धा जिनास्तेपि, प्राग्भवे गुरुबोधिताः । जाता अप्रतिपातेन, बोधवन्तो भवेऽत्र हि ॥ ११४ ॥ येपि श्राद्धकुले जाता, निसर्गेणैव सद्दृशः । प्रायस्ते प्राग्भवे चीर्ण-मोक्षमार्गा गुरोर्मताः ॥ ११५ ॥ जीवाजीवाऽश्रवबन्धाः, संवरो निर्जरा शिवं । नातीन्द्रियार्थदृग्वाणी-श्रवणाद्दृत ऊह्यते ॥ ११६ ॥ अत एव हि सम्यक्त्वे, प्रतिबन्धकशान्तितः । लभ्येप्युक्तमार्यवर्यैरुपदेशोद्भवत्वतः ॥ ११७॥ अविनीतो मदाध्मातो, न स्याद् विनयवान् गुरौ । शुश्रूषकः, श्रुतज्ञानी, कुतः स्वप्नेप्यसौ भवेत् ॥११८॥ एष्वज्ञातेषु तत्त्वेषु, परोक्षं सर्वथा शिवम् । विद्यात्सदा ज्ञानपूर्णं, जन्ममृत्यादिवर्जितम् ॥ ११९ ॥ संसारे यत्र कुत्रापि, जायते जन्तुराश्रये । दुःखं जन्मजरामृत्यु-सम्भवं ह्यनिवारितम् ॥ १२० ॥ सामस्त्येन सरत्यत्र, जातोऽङ्गी प्रोज्झ्य मेलितम् । अतः संसारसञ्ज्ञाऽत्र, सार्थका बुधदेशिता ॥ १२१ ॥ मेलितं नहि मोक्तव्यं, त्याज्यं स्थानं न च श्रितं । सच्चिदानन्दपूर्णत्वं, सदाऽत्रातो मतं शिवम् ॥ १२२ ॥ शिवे ज्ञाते स्वरूपेण, संसारे दुःखसङ्कुले । भव्यो जीवो भवेत् साध्ये, शिवे यत्नपरः सदा ॥१२३॥ निश्चयः शिवसाध्यस्य, हेतुः सम्यक्त्वगः परः । शिवसिद्ध्यै ततो धीमान्, ज्ञीप्सति प्रापकेतरे ॥ १२४ ॥ बन्धाश्रवौ भवे हेतू ; शिवे. संवरनिर्जरे । मनुते गुरुसद्वाक्य-सुधापुष्टान्तरो नरः ॥ १२५॥ एतदेवं गुरुर्दद्याद्, ज्ञानं संसारतारकम् । अन्यत्रासुलभं, लोको, दद्याज्ज्ञानं भवप्रदम् ॥ १२६ ॥ हानान्मानस्य विनयाद्, गुरोर्ज्ञाति इमे उभे । हानायाश्रवबन्धानां, ससंयमं तपश्चरेत् ॥१२७॥ विनयाद् गुरुकुले वासस्ततो ज्ञानादयो गुणाः । विवर्धन्ते, ततो मुञ्चेद्, गुरुं यावद्भवं नहि ॥ १२८ ॥ सहानेकैर्व्रजेत् सिद्धिं, विनयी गुरुवासयुक् । नैकसिद्धा हि भूयांसो, जह्यान्मानमितो बुधः ॥ १२९ ॥ दृश्यतां मानमत्तोऽसौ, भरतो लघुबान्धवान् । अभ्यषेणयदुज्झित्वा, मर्यादां कुलगां निजाम् ॥ १३० ॥ बाहुबली मदारूढो, यानुपर्षभमार्त्तिमान् । ज्ञानिभ्यो लघुबन्धुभ्यः, सम्भाव्योनत्वमात्मनः ॥ १३१॥ त्रिपृष्ठो मानतोऽकार्षी-न्निदानं मथुरापुरि । प्राग्भवेऽतो गतः श्वभ्र, न कर्म पक्षपातकृत् ॥ १३२ ॥ मेघाम्भोभिः परिप्लाव्य, साकेतं तापसौ मुनी । गतौ श्वभ्र न किं मानो, महान्तमपि पातयेत् ? ॥१३३॥ सीतां सतीं विदन् लङ्काधिपो मानादनर्पयन् । सराष्ट्रराज्यं स्वकुलं, न विनाश्य गतस्तलम् ? ॥ १३४ ॥ मार्दवेन ततो मान, निहत्य गुरुमाश्रयेत् । ज्ञानश्रेष्ठा गणिप्रष्ठा, यावज्जीवं यथा जिनम् ॥ १३५ ॥ श्रुत्वा गुरुमुखाद् भूयोऽमुत्र तद्धीनतां मदाद् । गुरुसेवी बुधो जातु, नहि मा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्यति केनचित् ॥ १३६ ॥ श्रुत्वा यक्षासमा आर्याः, प्रेक्ष्य वज्रसमान् मुनीन् । कः श्रुतेन मदं कुर्याद्? रङ्कश्चक्रिपुरो यथा ॥ १३७ ॥ गतो जन्तुर्निगोदेषु, शाकलभ्यार्पणं गतः । निरादिके भवे भ्रान्तः, गुरुर्भूतेऽत्र को मदः ? ॥ १३८ ॥ यथा भ्रम्यां स्थितो बालो, नोच्चस्थोऽपि मदं व्रजेत् । विदन् क्षणान्तरे पातं, को मदोऽतो भवभ्रमे ? ॥१३९॥ किं मदेन गुणाढ्यत्वे, हीनगुणेऽप्यनेन किं ?। न मदेन गुणोत्पादो, गुणहानिस्त्वतो घना ॥ १४० ॥ मोक्षाध्वा प्रगुणस्तस्य, मदं हत्वा भवेन्मृदुः । लघु ग्रामं गमी गन्ता, ऋजुर्वक्रो विलम्बतः ॥१४१॥ गुणान्वेषी मुमुक्षुः स्या-न्ना-मृदोरेषणा गुणे । गुणप्राप्योऽपवर्गोऽतो, मानिनो नहि सम्भवेत् ॥ १४२ ॥ अनादितो गुणैर्हीनस्तान् यात्येतत्-प्रशंसया । दर्शनज्ञानचारित्र-शंसाऽचारोऽत्र सत्तमः ॥ १४३ ॥ प्रेक्षेतावममात्मानं, यस्तस्मिन् स्याद् गुणागमः । गु-णापूर्णं मनो दृष्ट्वा, कथमायान्ति सद्गुणाः ? ॥ १४४ ॥ गुणाः कर्मक्षयायालं, चेत्ते तं कुर्युरञ्जसा । युक्ता अन्यत्र ते तं न, तडागाम्भोऽग्निवत् क्षमाः ॥ १४५ ॥ स्वभावतो गुणाः सर्वेऽनुबन्धिनो गुणावलौ । चेत्ते दोषेषु युज्यन्ते, यतन्ते दोषपोषणम् ॥ १४६ ॥ परिकृत्तश्रुतौ पुंसि, कुण्डले कोऽपि नार्पयेत् । मुनौ विनयहीने न, मुक्त्यर्हं श्रुत-मर्पयेत् ॥ १४७ ॥ नाभिमानी गणे तिष्ठे-न्नागणस्य श्रुतक्रिये । श्रुतक्रियोद्भवो मोक्षो, मोक्षाद्भ्रश्यति मानवान् ॥१४८॥ विद्यां दातुं समायातोऽतिशयी कोप्युपाश्रयम् । अविनीतान्मुनीन् प्रेक्ष्य, बहिर्व्याघुट्य जग्मिवान् ॥ १४९ ॥ विनयः शासने मूलं, विनयादभिगम्यते । लोकेऽपि शिक्षिता अश्वाः, सत्क्रियन्ते पदे पदे ॥ १५० ॥ सामाचार्यः प्रदीयन्ते, धार्यन्ते च मुनीश्वरैः । प्रह्वैर्न ता विना मोक्ष-प्रापकं चरणं भवेत् ॥ १५१ ॥ आचार्योऽपि गणाधीशोऽधीत्यादौ वन्दतेऽपरान् । नम्रो विनयवान् साधुर्यथा वृक्षः फलोच्छ्रितः ॥ १५२ ॥ गौतमोऽपि गणिप्रष्ठः, प्रेक्ष्य ज्येष्ठकुलं गतः । केशिनो न समीपं किं,? श्रुत्वैतद्विनयी भव ॥ १५३ ॥ क्रोधं हत्वा मनः शान्तं, विनयेनार्जिता गुणाः । मानं निहत्य शोध्यास्ते, यदि फलस्य संस्पृहा ॥ १५४ ॥ क्षयोपशम एवादौ, कर्मणां गुणहेतुकः । तत्रांशेनोदयोऽवश्यं, सातिचारास्ततो मुखे ॥१५५॥ अत एवोच्यते सुज्ञैरादौ स्यात्सातिचारता । क्रियाणां निरतिचाराः, फलरूपा क्रिया-स्ततः ॥१५६॥ गुणस्थानेषु षष्ठं प्राक्, प्रमत्तसंयताभिधम् । अप्रमत्तः संयतः स्यात्ततोऽग्रे सप्तमे गुणे ॥१५७॥ आद्यानि सकषायाणि, गुणस्थानानि तत्पुरः चत्वारि निष्कषायाणि, न प्राग् व्रतमुत्तमं ततः ॥ १५८ ॥ वर्जनेनातिचाराणां, धर्मी प्राग् यतते यतः । सातिचारमनुष्ठान-मतिचारभयान्विते ॥ १५९ ॥ बिभेति नातिचारेभ्यो, धर्मं च तनुते पुमा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न । द्रव्यधर्मो भवेत्तस्या-तिचारभीलुके परः ॥१६०॥ अत एव न देवानां, ज्ञानसामर्थ्यशालिनाम् । न व्रतं यद् भयं दुःखं, पुण्यप्राग्भारवतां न तत् ॥१६१॥ वाञ्छानन्तरसिद्धार्थास्तेऽतो गुप्तीर्दधुर्न ते । न चागुप्ते व्रत तन्न, निर्जराणां व्रतं भवेत् ॥१६२॥ परायत्तं मनो यस्य, स भवेद्व्रतधारकः । शास्त्रादिष्टे विधानेऽपि, सूरये प्राग् निवेदनम् ॥१६३॥ तपोऽभ्यन्तरमाद्यं तत्, तत्राप्याद्यं निवेदनम् । सूरये वाचनादीनां, निर्माये तत् परे न तु ॥१६४॥ अत एवोच्यते शोधिः; स्यादृजोर्न परस्य तु । आपाते त्वतिचाराणां, प्रतिक्रान्त्याद्यशोधनम् ॥१६५॥ अविचार्य यथा बालो, लज्जां त्यक्त्वा वदेदृजुः । आलोचयेदतिचारान्, यस्तथा स्यात् स शुद्धिभाक् ॥१६६॥ यथा दृब्धा क्रिया सातिचारा भावेन येन तु । तां तथैव विना मायां, गुरोरुक्त्वैव शुध्यति ॥१६७॥ मायां चेत्तत्र युञ्जीत, स्वल्पामप्यग्रतो गुरोः । कुर्वंस्तीव्रं तपो नो स, शुद्धिमाप्नोति कल्मषी ॥१६८॥ लक्ष्मणार्या यथा भावं, स्वं विलोप्य गुरोः पुरः । आलोचयन्त्यपि प्राप, किं न भीमं भवभ्रमम् ? ॥१६९॥ आलोचनापरिणतो, निर्मायं शुद्धिभाग् व्रती । विनाप्यालोचनां गीतं, यद् द्रव्यादिसमं तपः ॥१७०॥ बालग्लानजराजीर्ण, चाचार्याः प्रेक्ष्य शोधनम् । वैचित्र्येणार्पयन्तीष्ट-सिद्धिदं न तु मायिने ॥१७१॥ धर्मे हितकरी माया, नाल्पाऽप्याम्नायते श्रुते । मायाश्रुतं तपः कुर्वन्, स्त्रीवेदो यज्जिनोऽभवत् ॥१७२॥ माययान्धासि गृद्धोऽगादाषाढो नर्तकावलिं । त्यक्त्वा चारित्रमारब्धो, नाट्यं कर्तुं नृपाग्रतः ॥१७३॥ दोषयुक्तोऽयमात्मा यदनाद्यशुभनाटितः । नेक्षते स्वगतान् दोषान्, ज्ञातान् वस्ते च मायया ॥१७४॥ यथा बाधां घनां कुर्याद्, गड्वन्तर्गोपितं नृणां । मायाऽऽच्छादितदोषाणां, परिणामोऽतिदारुणः ॥१७५॥ गोपितं स्याद् व्रणं जातु, नानर्थाय शुभोदयात् । माययाच्छादितो दोषो, नश्येन्नानन्तजन्मभिः॥१७६॥ स्वदोषाच्छादनेप्सुः स्यादन्यात्मगुणलोपनः । परासद्दोषवाची च, शाठ्यं पापैकसारणिः ॥१७७॥ असतोऽपि गुणान् मायी, स्वस्मिन् मन्यत आदरात् । ततो गुणार्जनोद्योगः, स्खलितेऽपि शठे नहि ॥१७८॥ अत एव गणिप्रष्ठैः, सूत्रेषूक्ता समाधिकृत् । दोषाणां निन्दना गर्हा, प्रतिक्रान्तिश्च धर्मिणाम् ॥१७९॥ प्रतिक्रान्तश्च दोषेभ्यो, नाहंतां गुणवत्त्वतः । धारयेदात्मनीष्टार्थं, ततो व्युत्सृष्टिरात्मनः ॥१८०॥ गुणितामदनाशायोत्सर्गे सामायिके नतौ । आत्मव्युत्सर्जनं सूत्र-कारैराम्नातमादरात् ॥१८१॥ असतीं दोषहानिं स्वां, गुणवृद्धिं च विष्टपे । द्योतितुं यतते मायी, सर्वं मत्वाऽपट्वं जनम् ॥१८२॥ हानिं ज्ञात्वाऽपि दोषाणां, वृद्धिं गुणगतां परे । लोपितुं तान् जनान् म-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वा, यतते ऽन्धाभशठाग्रिमः ॥१८३॥ अन्तरायोदयाल्लाभ-मलब्ध्वाऽपि प्रकाशितुम् । स्वस्यापह्नोतुमन्यसत्तं यतते शठः ॥१८४॥ ख्यात्यर्थी ख्याति मायावी, दानं पुण्यं पराक्रमम् । असत्यं सत्यमन्यस्य, कुतेऽन्धं गणयन् जगत् ॥१८५॥ धर्माख्याप्यपि लोकानां, रंकमृद्धं पृथग्भणेत् । धर्मे मार्गपरः साधुर्यथा निःस्वे तथेश्वरे- ॥१८६॥ व्यसनानि यथा लोके, स्वागमानि पुरः पुनः । स्वभावरूपमायान्ति, मायापीयं दुरन्तगा ॥१८७॥ कृत्वाल्पं दर्शितुं भूरि, धार्मिकाणां मनो यदि । शीले दाने व्यये तीर्थे, माया गच्छति कुत्र न? ॥१८८॥ ईश्वरोऽपि धनं लोकाद्, गोपितुं पृथिवीतले । निखाति मायया तेन, गीताख्या प्रणिधिर्निधौ ॥१८९॥ आर्जवेन ततो मायां, हत्वा शुद्धात्मतां श्रयेत् । जाताजाता निहन्तव्या, मायेत्युक्तं बहुश्रुतैः ॥१९०॥ अविश्वास्यो भवेन्मायी, नागवन्निष्ठुराशयः । सर्वत्र शङ्किताः पापाः, न मायी क्वापि विश्वसेत् ॥१९१॥ देवे गुरौ तथा धर्मे, वात्सल्ये तत्त्वबोधने । मूलं विश्वास एषोऽर्हं, विश्रम्भं न सृजेच्छठः ॥१९२॥ तैरश्चीं गतिमाप्स्यन्ति, नूनं मायाविनो नराः । रम्या रत्नत्रयी यत्र, नायाति श्रुतिगोचरम् ॥१९३॥ शुद्धं कृत्वा मनस्तस्माद्, यावत्कैवल्यमाप्यते । गुर्वायत्तेन तावद्धो, निर्मायं स्थीयतां पथि ॥१९४॥ प्रमादा विनिवर्तन्ते, गुणे षष्ठे मुनेः पुनः । दुर्वारा सप्तमे माया, गुणे याऽप्यनुवर्तते ॥१९५॥ माया नान्यैः प्रतिकार्या, यथा क्रोधादयः पुनः । मायैवास्याः प्रतिकारोऽस्तोऽप्रमत्ता गतास्तकाम् ॥१९६॥ दुष्प्रयुक्तस्य दम्भस्य, शासनावर्णकारिणा । दम्भ एवौषधं तेना-प्रमत्तस्तं चिकीर्षति ॥१९७॥ रक्षिका शासनस्यात्र, सा नैवान्योपघातिका । अत एव न मत्तोऽसौ, मायां कुर्वन् सुसंयमी ॥१९८॥ वञ्चयन्ते जनान् मायापरा लोका न जानते । वञ्चितः स्यात् परो नो वा, स्वात्माऽवश्यं तु वञ्चितः ॥१९९॥ तदमायो मुनिर्भूत्वा स्वान् दोषान् विधिवद्दिशेत् । गुरुभ्यो येन चारित्रं, निरघं स्याच्छिवावहम् ॥२००॥ क्षान्त्या लब्धो मृदुत्वेन, संस्कृतो गुणसङ्ग्रहात् । आर्जवेन धृतः शुद्धो, धर्मः किं न शिवातये? ॥२०१॥ परे देवत्वमिच्छन्तः, कुदेवत्वमधिश्रिताः । अशक्ता निग्रहं कर्तुं, लोकानां कर्मधारिणाम् ॥२०२॥ तथापि मायया लोकान्, विप्रतार्य मृषोक्तिभिः । वयं निग्रहकर्तारोऽप्रीतेष्वित्युद्गृणन्ति ते ॥२०३॥ युग्मम् ॥ निग्रहश्चेत् कृतस्तेन, तद्भक्ते निग्रहः कुतः? । तद्भक्तश्च किं लोको, निग्रहोज्झितविग्रहः? ॥२०४॥ स्वस्वकर्मभुजो लोकाः, स्वस्वकर्मकृतः पुनः । कर्तारमत्तुयात्येतत्, कर्म-





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गां वत्सको यथा ॥ २०५ ॥ सयोगः कुरुते कर्म, सयोग एव तत्फलं । भुनक्त्यत्र न सङ्क्रान्तिः, पृथक्कर्म पृथग्भवी ॥२०६॥ अनुग्रहैककर्माण, ईशाश्चेत् किं समे न हि । अनुग्रहफला भक्ताः, परेऽनुग्रहवञ्चिताः ? ॥ २०७ ॥ निग्रहः कर्मणा स्वेन, स्वेनैवानुग्रहस्तथा । शुभाशुभानि कर्माणि, करोत्यङ्गी भुनक्ति च ॥ २०८ ॥ उमासक्तो हतः शम्भुः, पूज्यतां प्रापितो जने । तथास्थो नन्दिना धूर्तैर्नीतःसोऽपीश्वरे पदे ॥ २०९ ॥ सयादवपूरीदाहात् , सन्तुष्टानां द्विषां कृते । या लीला दर्शिता लोके, हलिना हरिवाक्यतः ॥ २१० ॥ सा कामगर्दभैरुक्तेश्वराथा स्वं समाश्रिता। ऋजुर्जनो न किं धूर्तैर्वञ्च्यते छन्नमायया ? ॥२११॥ मोक्षमार्गाध्वनीनं चेद् , देवं गुरुं च देशयेत् । आद्दत्यो देशकः स स्याद् धूर्तानां स कथं भवेत् ? ॥२१२॥ अर्थकामैकगृद्धास्तत्, परामालम्ब्य धृष्टतां । देवानां च गुरूणां च, व्याजेन धूर्त्ततां श्रिताः ॥२१३॥ ईश्वरार्पितसौख्येप्सुर्मुग्धो विश्वे जनो भृशं । तत्र कामार्थगृद्धाः किं, वञ्चयन्ते ठका नहि ?॥२१४॥ सरलाः कतिचिल्लोके, सन्मार्गस्योपदेशकाः । नैर्ग्रन्थे वचने रक्ताः, श्रावकाः कतिचिन्ननु ॥ २१५ ॥ अजैना गुरवः सर्वे, ज्ञातिं चैत्यं मठं धनम् । अधिष्ठायैव वर्त्तन्ते, गृहिभ्यो भारिताः पुनः ॥ २१६ ॥ सदारा गुरवो जाताः, सक्षेत्रा उपदेशकाः । कामभोगमयो धर्मो, न किं विश्वे ठकैः कृतम् ? ॥२१७॥ पूज्यो देवो गुरुः सेव्यः, कार्यो धर्मो मुमुक्षुभिः । मन्वानो पि जनो, धूर्तैः पात्यते भवसङ्कटे ॥ २१८ ॥ ऋजवो मृदवः क्षान्ता, जना धर्माधिकारिणः । वदन्तोऽपीति हा ! धूर्ताः, क्रुद्धा मत्ता शठाः बभुः ॥ २१९ ॥ धर्मा वैराग्यमूलाः स्युर्विरक्ता गुरवो भवात् । ज्ञानानन्दभृतो देवा, इत्थं वादाः कृतौ वृथा ॥ २२० ॥ भवो जन्मादिदुःखाढ्यो, भवः कामकुदुद्भवः । वदन्तोऽपीति संसार-तारकान्न ठका जगुः ॥ २२१ ॥ क्षान्त्या धर्मं परं प्राप्य, मार्दवेन विभूष्य च । शोधयित्वाऽऽर्जवेनार्यो, रक्षेद् धूर्तप्रसङ्गतः ॥ २२२ ॥ प्रातभूषितशुद्धेन, जीवो धर्मेण नन्दति । यावल्लोभाब्धिवेलाभिः, क्षुद्राभिरपि नोह्यते ॥ २२३ ॥ विकारादात्मनो रम्ये, रागाल्लोभः प्रसूयते । जातश्चोद्वेलमत्यन्तं, नभस्वद् ध्रुवमेधते ॥ २२४ ॥ लब्धुमिच्छति लोभेन, लाभो लोभं समेधते । लाभलोभौ तदन्योन्यं, वर्धेते मानवर्जितौ ॥ २२५ ॥ बीजं यथा फलं दत्ते, फले बीजान्यनाहतम् । लोभाल्लाभो भवेत् तस्माल्लोभश्चासीम उद्भवेत् ॥ २२६ ॥ हते लोभो हतो लाभे, भवेद्वा न भवेदपि । लोभे हते हतो लाभो, नश्येत् सन्ततिरेतयोः ॥२२७॥ बीजे नष्टेऽङ्कुरो न स्यान्, नष्टेऽस्मिन् बीजवि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्लवः । तदेतरविनाशेना-खिला नश्यति सन्ततिः ॥ २२८ ॥ या लोभलाभयोरत्र, सन्ततिः स्याद्दुरन्तका । लोभनाशैकनाश्या सा, मूलाल्लोभं त्यजेत् सुधीः ॥ २२९ ॥ लाभो न जनयेल्लोभं, तद्गं लोभं यदि त्यजेत् । लाभो न लोभमात्रोत्थः, सोऽन्तरायक्षयोद्भवः ॥ २३० ॥ लोभः स्वतन्त्रत्याज्योऽस्ति, तत्यागे लाभवानपि । कर्मणा बध्यते नैव, लोभेऽलाभेऽपि बन्धवान् ॥ २३१ ॥ हते लाभेपि लोभेन, श्रयेतां कर्मणां दृढौ । जीवे स्थितिरसौ यौ द्राक्, सम्परायप्रवर्धकौ ॥ २३२ ॥ हते लोभे तु लाभान्न, प्रकृत्यंशोपि कर्मणां । प्रातिहार्योद्भवा पूजाऽबन्धके केवलिन्यपि ॥ २३३ ॥ लाभे नैकतरोऽपि स्याद् , बन्धो नैवाश्रवो न च । कषायजाश्रवो लोभाद्बन्धोऽघस्थितिभावयोः ॥ २३४ ॥ लोभ औदयिके भावे, लाभः शस्तेषु त्रिष्वपि । लोभः कर्मविकारात्मा, लाभस्त्वात्मगुणोऽनघः ॥ २३५ ॥ लोभं न जनयेल्लाभोऽननुबन्धी शुभोदयात् । यो लाभो जनयेल्लोभं, सातिचारवृषोद्भवः ॥ २३६ ॥ लोभानुबन्धिनं लाभं, ये श्रितास्ते तलं गताः । लोभानुबन्धरहित-लाभवन्तो दिवं गताः ॥ २३७ ॥ शर्करामाक्षिकातुल्यो, जीवो निर्लोभलाभभाक् । सश्लेष्मसरघातुल्यो, लाभे लोभानुगे रतः ॥ २३८ ॥ लाभाय लब्धातीसर्गः, शास्त्रेणापि प्रणोद्यते । लोभाय लब्धातीसर्ग,ऋषीणां गर्हणास्पदम् ॥ २३९ ॥ लोभस्यापि समुत्सर्गः, शस्तो नो लोभहेतवे । लाभाय त्वतिसर्गोऽस्य, लोभस्य शस्यते ध्रुवम् ॥२४०॥ लोभस्य परिहर्तारो, येऽन्तर्लोभविभावनात् । अभव्या वापि ते भव्या, न कश्चिन्नियमोऽमुतः ॥ २४१ ॥ अलोभकं पदं ध्यात्वा, ये लोभत्यजनोद्यताः । भावलिङ्गाः पदं लातुं, योग्याः; सर्वज्ञताङ्कितम् ॥ २४२ ॥ त्यागे लाभस्य लिङ्गं स्याद् , द्रव्यरूपं स्तुतेः पदं । भावलिङ्गं भवेल्लोभत्यागान्निःश्रेयसास्पदम् ॥ २४३ ॥ लोभतिरयक्षया प्रोक्तं, परिग्रहान्निवर्तनम् । लाभतिरयक्षया परिग्रहान्निवर्तनं तथा ॥ २४४ ॥ लोभबुद्धया भवेल्लाभे,कर्मणामाश्रवस्ततः । उपसृष्टो गृहस्तस्मा-दात्तैः पञ्चम आश्रवे ॥ २४५ ॥ साधुत्वे बाधमाधत्ते, लाभो लोभाविलात्मनि । निर्लोभलाभहीनो न, क्षमः स्यान्मोक्षसाधने ॥ २४६ ॥ नग्नाटा निह्नवाः सर्वे, विसंवादिपदं गताः । उत्थाप्य नितरां लाभं, लोभेनोज्झितमीप्सितम् ॥ २४७ ॥ परं पोते पतत्रीवाऽन्नपानालयतुम्बकम् । श्रितास्ततोऽभवत्तेषां, न्यायो ज्वरपलाण्डुकः ॥ २४८ ॥ लोभयुक्तोऽर्हता लाभस्त्याज्यत्वेन निदेशितः । गृहत्यागे श्रितं किं न, निर्ग्रन्थत्वमुदीरितम् ? ॥ २४९ ॥ नैकेन्द्रियाद्या वस्त्राद्यै, रहिता अपि साधवः ।

78978



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्हन्तः साधवः शक्रा-दिकृतां भूतिमाश्रिताः ॥ २५० ॥ कर्म सम्बन्धमात्राच्चे-त्सिद्धाः किं कायसङ्गिनः ? । क्षेत्रं
कालो गतिर्लिङ्गं, सिध्यत्सु किं न साध्यते ? ॥ २५१ ॥ लोकस्याग्रं गताः सिद्धा, धर्मास्तिकायसङ्गताः । अधर्मा-
काशसम्बद्धा, एव तत्र न किं स्थिताः ? ॥ २५२ ॥ ग्रहिलो नौचितीमञ्चेत् , कार्यसिद्धेः पराङ्मुखः । निर्वस्त्रो
बहुवस्त्रो वा, नोपायस्य पथेपि सः ॥ २५३ ॥ तथा नग्नाटमार्गस्य, नेता मूर्च्छां गतः पुरा । रत्नकम्बल आवि-
ष्टो, धर्मोपकरणं जहौ ॥ २५४ ॥ लोभत्यागेन लाभस्य, त्यागः परं मुनेः पदम् । लाभत्यागेन लोभस्य, त्यागस्तु मू-
र्खतास्पदम् ॥२५५॥ सम्भाव्यानर्थपातं तु, क्षुभ्येत् क्रुद्धः शठो मदी । लुब्धो ज्ञात्वापि लोभेन, तत्रात्मानं समुत्क्षिपेत्
॥२५६॥ स्वल्पकालाश्रयस्त्वाद्या, लोभे तु चिरराश्रिता । क्षिप्रनाश्याः परे ह्येष, न नश्यति भवान्तरे ॥२५७॥ नश्येत्
क्रोधः प्रणामेन,मानः सन्मानसाधनात् । माया बुद्धिप्रयोगेण, लोभस्तु तैः प्रवर्धते ॥२५८॥ पातालकूपसादृश्यं, लोभे यत्पू-
रितः पुनः । पुरः पुरो नवं वाञ्छन्, पूरितुं नैव शक्यते ॥ २५९ ॥ पूर्वे त्रयः सुखोच्छेद्या, यदेकस्मिन् गुणे मुनिः । युगपत्
छिनत्ति सत्तात-स्त्रीनपि श्रेणिगत्वरः ॥ २६० ॥ लोभो दुश्छेद आत्तो यन्नवमं स्थानकं मुनिः । खण्डान्
कृत्वाऽपि नोच्छेत्तुमेकाकिनमलं भवेत् ॥ २६१ ॥ अवमं नवमं हित्वा, दशमं स्थानमागतः । छिनत्ति खण्डखण्डेन, लोभं
दुश्छेदताऽस्य तत् ॥ २६२ ॥ छित्वैवं शमितोऽप्येष, दण्डादिकसमाश्रयात् । उद्भूय पातयेत् साधुं, यावदाद्यां
गुणस्थितिम् ॥ २६३ ॥ श्रेणिमूर्धस्थितं साधु-माद्यं गुणं समानयन् । लोभश्चकास्ति योधेषु, मोहस्यैष भयङ्करः
॥ २६४ ॥ त्यक्तं गृहं व्रतं चीर्ण-माचार्यादाप्तं श्रुतं । लब्धा श्रेणिः पराद्ध्वीर्याद्, गतं लोभात् समं हहा ! ॥ २६५ ॥
अर्धं न किञ्चिदस्त्यस्य, दण्डादेः परमात्मना । अकाण्डलोभलुब्धेन, पाते सैवावलम्बितः ॥ २६६ ॥ निर्मोहो मु-
च्यते चक्री, यः षट्खण्डधराधिपः । लोभाघ्रातो न रंकोऽपि, प्रत्युतोपैति दुर्गतिम् ॥ २६७ ॥ आदर्शभवने प्राप,
केवलं भरताधिपः । रङ्को वैभारगः प्राप, सप्तमीं गतपात्रकः ॥ २६८ ॥ त्यागवीर्ये समुत्पन्ने, लोभहान्या मनी-
षिणाम् । त्याज्ये न कोऽपि भेदोऽस्ति, बहोर्वाऽल्पीयसोऽर्थतः ॥ २६९ ॥ मुनित्वाप्त्यै विधिर्यः स्याच्छास्त्रदिष्टः
समो द्वयोः । स त्यागोपि विवेकोत्थः, समो बह्वल्पगः पुनः ॥ २७० ॥ शीघ्रं बहुभवन् लोभः, स्वल्पोऽप्येष स्व-
भावतः । विश्वस्यान्न ततोऽल्पेऽस्मिन्, श्रेणेस्त्वल्पोपि पातयेत् ॥ २७१ ॥ दुष्पूरा लोभगर्तेयं, सर्वैरपि मानवैः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संसारवर्तिनः सर्वे, भ्राम्यन्तेऽनेन निर्दयम् ॥२७२॥ क्षीणमोहा जिनाः सर्वे, ज्ञानावरणसंक्षयात् । तेषां सार्वज्ञ्यमप्येते, वीतरागा लुभेः क्षये ॥२७३॥ प्राबल्याच्चास्य मोहस्य, कथ्यते केवलोद्भवः । कषायाणां क्षये सर्व-ज्ञानं प्राप्यत ईश्वरैः ॥२७४॥ द्विमासकनकोत्थानो, न कोट्या निष्ठतां गतः । लोभोऽथं तद्दूरं पूर्व-मेष नैव प्रसज्यते ॥२७५॥ कार्षापणशतं वाञ्छन्नादौ लब्धे पुरः पुरः । वाञ्छन् नायं व्रजेन्नाशं, प्राप्य देवेन्द्रतां पुनः ॥२७६॥ इन्द्रास्तत्तद्विमानार्थं, कलहायन्त आत्मना । इति श्रुतगिरं श्रुत्वा, त्यजेल्लोभं न को बुधः ? ॥२७७॥ सामान्येन समे जीवा, लोभवार्धिप्लवा यतः । आहरदेहखश्वासवन्तः सर्वे तदाश्रयात् ॥२७८॥ परं पञ्चाक्षसञ्ज्ञित्वे, प्राप्ते लोभाङ्कुरा घनाः । अन्धो देहाश्रयापत्यग्रह एषां सदाग्रहः ॥२७९॥ व्यवहारपथं यातो, जीवो लुभ्यति कीर्तये । कीर्तिं च मनुते साध्यां, लक्ष्म्या नत्वन्यसम्भवाम् ॥२८०॥ मत्वैवं पूर्णयत्नेनाद्रियते लक्ष्मिहेतवे । 'यस्यार्थास्तस्य मित्राणी'-त्यादिसंस्कृतचेतनः ॥२८१॥ धनोपार्जनरक्तोऽसौ, लीनः प्राप्ते धने भृशं । जन्मनोऽस्मात् परं जन्म, भाव्यसौ प्रेक्षते नहि ॥२८२॥ लक्षणं सर्वतन्त्राणां, वाक्यैर्धर्मस्य निश्चितम् । प्रेत्य दुर्गतिमुद्ध्वस्य, धर्मः कुर्याच्छुभां गतिम् ॥२८३॥ यदार्थलोभो मन्दः स्यात्तदा धर्मादरो भवेत् । अत एवोक्तमार्तैर्यन्निर्लोभे धर्मसंश्रयः ॥२८४॥ हृद्याधाय परं जन्म, त्यक्त्वा लोभं सृजन् क्रियां । धार्मिकीं स्यादभव्यो वा, जीवो भव्यत्वभागपि ॥२८५॥ चरमावर्त्तवर्त्यङ्गी, मोक्षार्थी नेतरः पुनः । नैर्ग्रन्थं वचनं ह्यर्थ, इत्यसौ मन्यते हृदि ॥२८६॥ पुरो नैर्मल्यमागच्छन्, परमार्थं मनुते तकत् । उदग्रवीर्यसंयुक्तो, धर्मं दानादिकं श्रयेत् ॥२८७॥ क्षीणानन्तचतुष्कोऽसौ, मिथ्यामोहस्य नाशतः । बद्धलक्षोऽव्यये शेषं, मनुतेऽनर्थकारणम् ॥२८८॥ नैर्ग्रन्थे वचने लीनः, पुरस्कुर्याच्छिवं पदं । सर्वत्र दानशीलादौ, देवाद्याराधनास्वपि ॥२८९॥ अपुत्रा स्वामिना नुन्ना, सुलसा नाकिनोदिता । मोक्षं मुक्त्वा न मेऽन्येहेत्युवाचायं सतां नयः ॥२९०॥ आस्तिक्यामनुकम्पायुक्, स्याद् सम्यक्त्ववत्यपि । समग्रसंसृतेः खिन्नो, मोक्षमात्रार्थनः सुदृक् ॥२९१॥ प्रशान्तवाहिताऽतोऽस्य, संसारे देहसाधनः । मनुतेऽतो भवे सारं, साधनं जैनशासने ॥२९२॥ अतो नायं गुरोर्धर्माद्देवाद् भौगिकसाध्यदृक् । भोगाप्त्यै न विधत्तेऽयं, स्वप्ने गुर्वादिबाधनम् ॥२९३॥ सारभूतां मन्यतेऽसौ, सप्तक्षेत्रीं धनादितः । प्रत्यहं पोषमाधत्ते, तैरस्या मोक्षभावनः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥२९४॥ चैत्यानि मोक्षसत्यानि, तीर्थान्यव्ययपादिकाः । चतुर्वर्णस्तु सङ्घोऽयं, सार्थवाहोपमः शिवे ॥२९५॥ बिम्बानि जिनराजानां, भाव्यादर्शो निजात्मनः । युद्धनीतिः समाचारो, मत्वेत्युद्यच्छति प्रधीः ॥२९६॥ नष्टो न स यथा लोभस्तथापि नास्य साधनं । देवादिभ्यो न सेवायां, चैष बाधाय कुत्रचित् ॥२९७॥ लोभोऽनन्तानुबन्ध्येष, देवे धर्मे गुरौ तथा । निरपेक्षो भवेत्तस्मात्, साधने बाधनेऽपि वा ॥२९८॥ अत एवोच्यते क्रुद्धः सद्दृक्ष नागो-विधायिनि । अपकारमनास्तत्तु, देवाद्याराधनाश्रितम् ॥२९९॥ रुद्धा मृगावती पुर्यां, श्रीवीरस्य निनंसया । प्रद्योतेन जगामेयं, न धर्मे वैरसाधनम् ॥३००॥ एतल्लोभस्य साम्राज्य-मियंती भूमिमागतः । सद्दृक्कार्याणि देवादेर्मुक्त्वासक्तो धरेत्तकम् ॥३०१॥ शेषलोभाभिभूतात्मा, सद्दृग् नातो विरज्यति । आरम्भाद्भोगतोऽर्थाच्च, चारित्रप्रतिबन्धभाक् ॥३०२॥ मनुते वक्ति लोकानां, पुरश्चायमिदं वचः । श्रद्धाप्रतीतिरुच्यर्हं न नैर्ग्रन्थात् परं मतम् ॥३०३॥ नैर्ग्रन्थस्याभिलाषेण, दानाद्यां तनुते क्रियां । दुस्त्यजत्यागयथं सद्दृग्, मतो दुष्करकारकः ॥३०४॥ स्याल्लोभस्य यदा स्थित्याः, पल्यानां न्यूनतात्मनः । पृथक्त्वस्य तदा लोभं, व्रतबाधाकरं त्यजेत् ॥३०५॥ संविभागे मतं दानं, न्यायागतधनोत्थितम् । अपरस्वं च चैत्यादौ, प्रदेयमिति कीर्त्यते ॥३०६॥ देवादिपुष्पपूजायां, यथा लाभस्य कीर्तनात् । महादानं तु तद्यत् स्याद्, गुर्वदत्तविवर्जितम् ॥३०७॥ धर्मार्थं न करोतीहां, धनोपार्जनवर्धने । प्राप्ते व्यये तु सद्योगं, सप्तक्षेत्र्यां स मन्यते ॥३०८॥ वित्तार्थं नास्य धर्मोऽस्ति, वित्तं धर्मार्थमस्ति च । लुप्तायां लोभकाष्ठायां, स्यादेवं व्रतिनां मनः ॥३०९॥ मनस्यस्य परो भाति, पदार्थः पारलौकिकः । चैत्यतीर्थसमुद्धारेऽर्थं व्ययते सङ्घपुष्टये ॥३१०॥ सङ्घार्चां प्रतिवर्षं स, वात्सल्यं समधर्मिणाम् । यात्रात्रिकं श्रुतस्यार्चां, स्नात्रं देवस्ववर्धनम् ॥३११॥ उद्यापनं यथाशक्ति, ज्ञानाद्युत्सर्पणार्थकं । क्षणं गुरुप्रवेशेऽसौ, विधत्ते सङ्घतर्पणम् ॥३१२॥ दीक्षोद्यतं कुटुम्बं स्वं, निष्कामयति भावतः । क्षणं विधाय निस्वानां, सहार्थं वृत्तिसाधनैः ॥३१३॥ चैत्यार्चासङ्घकार्येषु, ज्ञाने भक्त्या धनं वपेद् । दीने हीने पशौ दुःस्थे, दयया लोभहानितः ॥३१४॥ समाचीर्णव्रतः श्राद्धः, प्रतिमाः स्वाः समुद्वहन् । लोभकाष्ठाप्रहाणाया-रम्भादीन् वर्जयेत् तथा ॥३१५॥ जीवितान्तसमापन्नो, लोभं व्युत्सृज्य सर्वथा । तीर्थे वनेऽजने देशे, संलिख्य मरणं श्रयेत् ॥३१६॥ अहो लोभस्य माहात्म्यं, यद् द्वादशवर्ती धरन् ।



For Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बदरास्वादलुब्धः स, भाविभद्रो वनं गतः ॥३१७॥ त्याज्यं सर्वं परेतेन, जानन्, लोभाज्जनः पुनः । अन्तेऽपि न व्ययेदर्थं, व्युत्सृजेन्न च धर्म्यपि ॥३१८॥ मृता नैके च लोभान्धा, जातास्तिर्यग्भवेष्वपि । अधिष्ठाय निधिं खातं, निजान् घ्नन्ति कुटुम्बिनः ॥३१९॥ श्रावका अपि लोभान्धा, गृह्णन्ति धार्मिकं धनम् । सहसाऽतिचरन्त्यात्तान्यपि मौग्ध्याद्व्रतानि च ॥३२०॥ मातापित्रादिनोक्तं स्वं, धर्मार्थे न व्ययन्त्यपि । कीर्तिलोभान्धितात्मानो, विधित्सन्ति परं स्वकम् ॥३२१॥ कृत्वा स्वं क्षेत्रसाच्छ्राद्धो, लोभोपप्लुतचेतनः । तद् व्ययत्यन्यथाकारं, कृत्वा वा न व्ययेदपि ॥३२२॥ लाभभूपकृतामाज्ञां, कृत्वा शिरसि किं जनाः । न कुर्वतेऽग्निपातादि वान्तसन्मार्गवासनाः ॥३२३॥ देवधर्मगुरूभ्योऽपि, किं न दुह्यन्ति लोभतः । दानस्यापि प्रसङ्गे यत्, स्वं वदन्त्यन्यदीयकम् ॥३२४॥ अकल्प्ये लोभतः क्षिप्त्वा-, कल्प्यं दत्ते न साधवे । एवं चेदन्नदानादौ, लोभः किं न परत्र सः ? ॥३२५॥ संलिख्यानशनस्थोऽपि, श्राद्धो लोभेन किं नहि । इहलोकाशंसनाद्य-तिचारान् कुरुते मुधा ? ॥३२६॥ प्रपित्सवः परिव्रज्यां, किं लोभान्धितचेतनाः । उपेक्ष्यावसरं तस्या, न मग्ना भवसागरे ? ॥३२७॥ लोभसाम्राज्यमुद्वेलं, ब्रह्मचार्यपि शक्तिमान् । परिव्रज्यां समादातुं, सवैराग्योऽप्यलं न हि ॥३२८॥ पत्यौ मृते विशन्त्यग्निं, निःस्पृहा वनिता भवेत् । प्रविव्रजिषुः स्वे किं न, लोभान्मुञ्चति लालसाम् ॥३२९॥ सवैराग्यः समीक्ष्यार्चां, पौरसङ्घनृपैः कृताम् । संन्यस्यन् म्रियमाणो वा, लोभात् किं तत्र नो सजेत् ? ॥३३०॥ लोभान्धः स्वस्य सत्कारं, मीलयेच्छासनोन्नतिम् । परेषां गुणिनामेनं दृष्टिरागतया भणेत् ? ॥३३१॥ स्वरूपं दृष्टिरागस्य, लोभनिर्नष्टलोचनः । न वेत्ति प्रतिबन्धं यदसौ कुर्याज्जिनाश्रये ॥३३२॥ स्वस्य सङ्घे कुले गच्छे, साधौ लोभविमोहितः । दूषयन्नपरान् सत्यान्, महामोहं न किं व्रजेत् ? ॥३३३॥ लोभेनास्थाय साध्वादीन्, स्वान् परांस्तु जिघांसति । दुष्षमाकालजं पापं, तस्मिन्नेव पचेलिमम् ॥३३४॥ लोभेन गणलुब्धानां, मृषोक्तिः पाठव्यत्ययः । प्राच्यनाशो नवोत्पादः, शासनस्य विडम्बना ॥३३५॥ भाव्यनन्ताग्रसाम्राज्या-न्मिथ्यादृष्टिः सुरः क्वचित् । चेत्सान्निध्यकरः किं न, क्लेशिन्यास्तनयोद्भवः ? ॥३३६॥ गोशालस्य यथा तेजो-लेश्या संसारवर्धिनी । शासनस्य तु द्रोग्ध्री च, लुब्धैश्वर्यं सदा तथा ॥३३७॥ गणलुब्धो यथा गोष्ठा-माहिलो निह्नवोऽजनि । तथा गच्छादिलुब्धानां, साधुतापि भयङ्करी ॥३३८॥ यथा लुब्धो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गणेशत्वे, प्रेत्येह च भयङ्करः । वराहो वीरतीर्थस्य, तथा लुब्धाः परे पदे ॥३३९॥ त्यक्त्वा गृहं कुटुम्बं स्वं, देशं ज्ञातीगृहस्थताम् । मोक्षाय निर्गतो लोभा-दुपधौ सज्यते मुनिः ॥३४०॥ प्राबल्यं धृतिशक्त्योर्नोपधिः संयमसाधने । तेनोक्तोऽप्यद्भुतं लोभान्मुनिस्तत्रैव मुह्यति ॥३४१॥ आसने शयने स्थाने, परिवारे च पुस्तके । लोभान्मुह्यन् मुनिर्वाक्यं, स्थापयेन्मोक्षवन्धगम् ॥३४२॥ कर्मसंवरणायोक्त उपधिस्तीर्थपैर्मुनेः । शोभावृद्धिममत्वैस्तं, मुनिर्बन्धाय कल्पते ॥३४३॥ यथा वोद्रो जले कर्षन्, रङ्करक्षामनाः स्त्रियाम् । न जीवितं गतं विद्यान् मुनिर्लोभात्तथोपधौ ॥३४४॥ गृहिणां भवपाताय, गृहपुत्रादिसञ्चयः । यथा तथा मुनेर्लोभात्, शिष्यपुस्तादिसञ्चयः ॥३४५॥ चिन्तया गृहिणां पातो, भवाब्धौ दुस्तरे यथा । मुनेः तथा गौरवाय, शिष्यपुस्तादिचिन्तया ॥३४६॥ संयमायोपयोग-श्चेद्युक्तं साधनधारणम् । चेल्लोभायोपयोगोऽस्य, व्यर्थं साधनधारणम् ॥३४७॥ उपेक्ष्य जीवरक्षां चेन्, मुने रक्षसि साधनम् । शोभालुब्धस्तदा किं त्वं, ब्रूषे तद्धर्मसाधनम् ॥३४८॥ क्लेशेनोपार्ज्य रौद्रेण, रक्षन् धनगवादिकम् । गृही चेद्दुर्गतिंगन्तो-पधिलुब्धस्य ते न किं ? ॥३४९॥ भोक्तव्यं गृहिभिः कर्म-कृतमन्यार्थमात्मना । मुनेर्लुब्धस्य न्यायोऽसौ, स्यात् किं काकेन भक्षितः ? ॥३५०॥ मुने वेत्सि न किं पूजार्हदादेर्वारिता तव । निरवद्याप्यनुबन्धे, लोभः कस्ते मठादिषु ? ॥३५१॥ अनूद्यमपि ते न स्यात्, स्नानं भावात् शुचौ हि सं । वारितेत्यर्हदर्चा चेल्लुब्धः शोभादतः कथम् ? ॥३५२॥ पूजार्हांशूकयुग्मं ते, धार्यं मास्त्विवति वारिता । पूजा चेल्लुब्धचैतन्यो, धरसेंऽशूकपोट्टलान् ॥३५३॥ षट्कायजीवरक्षार्थं, पुष्पाद्यैः पूजनं न ते । स्थानाद्यर्थं तदा लुब्ध, आरम्भं किं न लज्जसे ? ॥३५४॥ अप्रमादेऽपि ते न स्यात्, प्राणिप्राणविराधनम् । इत्यर्चा चेन्निषिद्धा ते, लुब्धः किं हंसि प्राणिनः ? ॥३५५॥ द्वितीयं ते पदं पात्, नेति चित्ते विचिन्तय । लोभेनापि द्वितीयं चेद्, भ्रष्टः किं कमलप्रभः ? ॥३५६॥ अर्हता तीर्थमादिष्टं, मुक्त्यै ज्ञानादिसाधनात् । लुब्धस्त्वं चेद्भवे लोकान्, क्षिपसीत्यवनं कुतः? ॥३५७॥ त्वं सहायोऽसि लोकानां, भवाब्धितरणैषिणां । त्वां नमस्यन्तीति लुब्धस्त्वं, किं भयं शरणान्न तत् ? ॥३५८॥ मुनिसङ्घप्रभावेन, तीर्थमित्यात्तगीः परं । स्वार्थे लुब्धे मुनित्वं चे-न्नष्टं श्रीजैनशासनम् ॥३५९॥ सङ्घेन त्वं प्रदायान्न-पानाद्यं नम्यते हृदा । संयमै



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कसहायत्वात्वयि लुब्धे समं गतम् ॥३६०॥ नैर्ग्रन्थस्यास्य तीर्थस्य, रक्षावृद्ध्यर्थमामतः। सङ्घेन लुण्टयन् लोभात्, त्वं किं विश्वासघाती न? ॥३६१॥ तप्ता भवाग्निना लोकाः, शान्तये त्वत्पदं गताः। लोभात्तेभ्यो धनं गृह्णन्, कथं निर्वापयिष्यसि? ॥३६२॥ धर्ममेघाशया सङ्घः, प्रेक्षते त्वां मयूरवत्। तं दहन्नार्त्तरौद्राभ्यां, लोभाच्चेत्त्वां किमु ब्रूयात्? ॥३६३॥ मठान्तेवासिपुस्तेषु, त्वं लुब्धः शरणागतान्। परिग्रहारम्भभीतान्, नालं त्रातुं क्षणं क्षमः ॥३६४॥ निरवद्ये पथे पान्थः, परांस्तत्रावतारयन्। मतो गुरुर्निमग्नस्त्वं, लोभात् सावद्यवर्त्मनि ॥३६५॥ संसाराब्धि तरन्नेव, तारयेदपरान् श्रितान्। लोभेन त्वं ब्रुडंस्तेषां, भवितासि न तारकः ॥३६६॥ अभव्यो यत्य-लुब्धः सन्, भविनां तारको भवेत्। त्वं भव्योपि प्रलुब्धः सन्, भव्यानब्धौ मज्जयसि ॥३६७॥ पात्रबुद्ध्या जनो दत्ते, मुने! भक्तादि ते परं। लुब्धः परिग्रहीकुर्वन्, पापात्तांस्त्रायसे कथम्? ॥३६८॥ मुधाजीवितया पात्रं, त्वं मतोऽसि तितीर्षुणा। लोभात्फलं तु भौमादेःराध्यन् किं फलमाप्स्यसि? ॥३६९॥ बालग्लानार्थमेषा ते, भिक्षा सम्पत्करी परं। लुब्धस्तामन्यथा कुर्वन्, शास्त्रवाक्यान्न लज्जसि? ॥३७०॥ मतस्ते पात्रनियोगोऽसह-शैक्षातुरार्थकः। धारयंस्तं ब्रुडन् लोभान्, नग्नाटान् किं वदिष्यसि? ॥३७१॥ गृहिणामुपकाराय, भिक्षायै भ्रमणं मतम्। कुर्वाणोपि च तल्लुब्ध, उपकारचिकीः कथम्? ॥३७२॥ प्रत्याख्यानस्य शोभा सा, दैनिकस्य यदर्पणात्। सूर्यादेस्तु भोक्तव्यं, लुब्धस्य ते तु का कथा? ॥३७३॥ निमन्त्र्य बालशैक्षादीन्, भोजनं यमिनां हितम्। निगृह्य लुब्धस्त्वं भक्षन्, स्तेनस्त्वं शासने न किं? ॥३७४॥ चेत्त्वं न लोभमेतोऽसि, जिग्मिषुर्भिक्षणे तदा। छन्दिताऽसि तपस्व्यादीन्, न चेत् काकश्ववर्तनम् ॥३७५॥ लुब्धोऽन्धसि न स्थविरो, नोपधौ स्याद्गणाग्रिमः। जानन्निति द्वयोर्लुब्धः, किं लज्जयसि तत्पदात् (न)॥३७६॥ सङ्ग्रहोपग्रहे रक्तः, सूरिः सर्वगणार्पकः। क्षमणे गच्छस-क्तोऽयं, भण्यतेऽतो न लुब्धता ॥३७७॥ वैयावृत्त्योद्भवं सातं, न कदाप्यपगच्छति। निर्लोभ एव तत्कुर्याद्, दिशाः शून्यास्तु लोभिनः ॥३७८॥ गृहस्थैर्यन्मुधा दत्तं, संयमोपग्रहाय ते। न दत्सेऽन्येभ्य उद्धृत्यै, लोभाद्वा! मोक्षगामिनम् ॥३७९॥ जानास्यदत्तमेतद्धि, लोभाद्यद् भक्षणं गुरोः। लोभात्तथापि कुर्वंस्त द्रुहो महाव्रतोद्धुरः ॥३८०॥ तन्वन् श्रीसङ्घवात्सल्यं, तीर्थकृत्त्वं समश्नुते। तनोषि लोभात्तज्जानन्, न ते का कार्यदक्षता? ॥३८१॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तन्वन् साधुषु वात्सल्यं, चक्री जात इहादिमः । विदन्नप्येतदाघ्रातो, लोभेन, न करोषि तत् ॥ ३८२ ॥ चतुर्षु तं धर्मभेदेषु, दानमादौ प्रकीर्त्यते । लोभेन ह्रियते तच्चेत्, काऽऽशा तवाव्यये पदे ॥ ३८३ ॥ श्रावकाणां व्रतेषूग्रं, मतं दानं शिवार्थकम् । लुब्धः साधुरकुर्वंस्तद्, भविष्यन्त्यां कथं भवेत्? ॥ ३८४ ॥ हत्वाऽनन्तानुबन्ध्यादीन्, सम्यक्त्वं शिवदायकम् । लब्ध्वाऽऽत्मरमणः त्वं सन्, मुने! लोभं दधासि किम् ? ॥३८५॥ हित्वा दारान् धनं गेहान् लब्ध्वा मोक्षप्रदं व्रतम् । महाव्रतधरो जातो, मुने! लोभं दधासि किम् ? ॥ ३८६ ॥ अधीते जिनराडुक्ते, षट्कायादिप्रदर्शके । श्रुते परीक्षितो गीते मुने ! लोभं दधासि किम् ? ॥ ३८७ ॥ पर्यायक्रमसंप्राप्तं, प्रकल्पादि त्वयाधीतं । गीतार्थो देशनार्हस्त्वं, मुने! लोभं दधासि किम् ? ॥ ३८८ ॥ स्वयं कार्यः परिहारो, यथावादी तथाक्रियः । हेयानामित्थमाम्नाते, मुने! लोभं दधासि किम् ? ॥ ३८९ ॥ ये त्वां श्रिताः (शिवो) गुणो-युक्ताः, शिवाय "स्पृहयालवः । तेऽनुकर्त्तार आचारं, मुने! लोभं दधासि किम् ? ॥ ३९० ॥ इच्छाकारादिकाः सामाचार्यश्चारित्रकारणम् । तिरश्चां चरणं नेतो, मुने! लोभं दधासि किम् ॥ ३९१ ॥ विनयः शासने मूलं, विनयो मोक्षपादिका । महानिधेः समं लब्ध्वा, मुने! लोभं दधासि किम् ॥ ३९२ ॥ अतिशायीनि शास्त्राणि, प्राप्तानि कृपया गुरोः । देवादीनां वरेऽतृष्णो, मुने ! लोभं दधासि किम् ॥ ३९३ ॥ पर्यायपरिणामाभ्यां, प्राप्तं शोधिकरं श्रुतम् । मेढीभूतोऽसि गच्छे त्वं, मुने! लोभं दधासि किम् ॥ ३९४ ॥ स्वरूपरमणीभूय, बाह्यं व्युत्सृज्य दुःखदम् । आराधनासमायुक्तो, मुने! लोभं दधासि किम् ॥ ३९५ ॥ प्रीत्यादिनाशको लोभो, विनयादिदवानलः । गुणश्रेणिनिघाती स, मुने! लोभं दधासि किम् ? ॥ ३९६ ॥ लोभेन प्राणिनो भ्रान्ताः, पतिता मोक्षमार्गगाः । प्रमादवृक्षबीजं स, मुने! लोभं दधासि किम् ? ॥ ३९७ ॥ नेशश्चेद्धर्तुमेनं त्वं, मोक्षे तत्प्रापके धर । एतदेव हि वैराग्यं, यन्नाशस्तेन तस्य तु ॥ ३९८ ॥ बाह्येऽनित्ये गतायाते, भवे प्राप्येप्यनेकशः । बाह्येऽर्थे [illegible]धता ते चेन्मोक्षाय किं तनुं त्यजेः ? ॥ ३९९ ॥ कुरु तत्र मुने! लोभं, यल्लब्धं नहि त्यज्यते । अनन्तत्वात्पुनस्तत्र, नाशतोऽपि प्रवर्तनम् ॥ ४०० ॥ हतः क्रोधो हतो मानो, हता मायाऽर्थना हता । प्राप्तो धर्मं परं दूरे, मोक्षात्सत्यो न चेदयम् ॥४०१॥ रत्नं वित्तव्ययेनात्तं, स्वर्णयुक्त्या विभूषितम् । आदर्शवत् परं मृष्टं, परं काचस्तदा किमु ? ॥ ४०२ ॥ आस्तिका



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम एवैते, धर्मवादपराः परम् । मुक्त्वाऽर्हतं न कश्चिद्यः, सत्यं धर्ममुपादिशत् ॥४०३॥ सत्यं द्विधा जने धर्मे, तत्राद्यं व्यवहारिकम् । तदाश्रित्य जनः सत्य-वादीति व्यवहारवान् ॥४०४॥ जने च केचिदर्था ये, स्वरूपेणातथा-विधाः । उच्यन्ते ते तथात्वेन, निःस्वो लक्ष्मीपतिर्यथा ॥४०५॥ अत एव च विद्वद्भि-र्भाषैषा व्यवहारिणी । उक्ताऽपरैव सत्या तु, याऽऽराधनोद्यते जने ॥४०६॥ पदार्था मुनयश्चेति, द्वयं सत्त्वेन कथ्यते । आराधनाश्रिता सत्या, यन् मुनीनां हितावहा ॥४०७॥ जीवादीनां पदार्थानां, येषां न्यक्षा विदा नहि । ब्रूयुः स्वरूपमेषां ते, किं न साहसवादिता ? ॥४०८॥ आभवं यः समस्तासु, क्रियासु प्राप्तचेतनः । अहंत्वेन, स वाच्यं स्वं, किं जीवमवम-न्यते ? ॥४०९॥ दुःखाद् भीरुः सुखं प्रेप्सुः, स्वयं सर्वप्रवृत्तिषु । वर्तमानोऽन्वहं लोकः, किं जीवमवमन्यते ॥४१०॥ आश्रयन्नेकमध्यक्ष-मप्रेक्ष्यात्मन उद्भवं । वदन् भूतोत्थमात्मानं, किं जीवमवमन्यते ? ॥४११॥ उत्थापयन्ननुमया-नुमां प्रतिपदं च ताम् । वार्त्तादिषु श्रयन्नज्ञः, किं- जीवमवमन्यते ॥४१२॥ गोचरातीतमध्यक्षमवैत्यात्मानम-ञ्जसा । गुणा ध्रुवेन्द्रियार्थास्तत्, किं जीवमवमन्यते ॥४१३॥ वर्णे गन्धे रसे स्पर्शे, भिन्ने किं घटदर्शनं? । गोचरातीत आत्माऽयं, किं जीवमवमन्यते ॥४१४॥ यथाऽऽकृत्यादिबोधेन, ज्ञानं घटपटादीषु । तथात्मा ज्ञानस्मृतिभिः, किं जीवमवमन्यते ? ॥४१५॥ न गुणो द्रव्यविमुख, इति ज्ञानाज्जीवाश्रयः । द्रव्यरूपः सपर्यायः, किं जीवमवमन्यते ॥४१६॥ गुणोऽपि पर्यवात्मा यद्, द्रव्यं पर्येति तत्तया । द्रव्यपर्यायमय आत्मा, किं जीवमवमन्यते ॥४१७॥ आकारः केवलः कुम्भे, मृद्वेति न वचस्तथा । जीवदेहमयो मर्त्यः, किं जीवमवमन्यते ॥४१८॥ द्रव्यं नास्ति विनावस्थां, नावस्था द्रव्यवर्जिता । ज्ञता जीवमयो भूत्वा, किं जीवमवमन्यते ॥४१९॥ पर्यवाणां समुत्पत्तिः, क्रियाकारणयोगतः । तदभावाद् ध्रुवे द्रव्ये, किं जीवमवमन्यते ॥४२०॥ जन्मनोऽस्माद् ध्रुवं जन्मो-त्तरं प्राग् यत् त्रिकालिकम् । जीवद्रव्यं बुधैर्मान्यं, किं जीवमवमन्यते ॥४२१॥ अनुकूलं सुखं दुःखं, प्रतिकूलं तु वेदयन् । श्रितः शुभाशुभं कर्म, किं जीवमवमन्यते ॥४२२॥ जीवे व्यपगते देहा-न्न ग्रावेव सवेदनः । तं च सूक्ष्ममिति मौग्ध्यात्, किं जीवमवमन्यते ॥४२३॥ कश्चित्कोऽपि परालोका-दभावान्न परागतः । प्रेत्याभावो न प्रत्यक्षात्, किं जीवमवमन्यते ॥४२४॥ धर्मिणां प्रेत्यसद्भावाद्, गतिरच्छैव किन्त्विमे । तत्सद्भावे किं भविष्यन्ति, किं जीवमवमन्यते ॥४२५॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नृणां सन्त्येव लोकेऽस्मिन्, ज्योतिष्का रत्नगेहिनः। उत्तरे प्राज्यधर्माणः, किं जीवमवमन्यते ॥४२६॥ नाकेऽत्यक्षे शिवेऽत्यक्षे, शान्तिर्न्यक्षा न किं नृणाम्। किं स्यात् कषायदावेन, किं जीवमवमन्यते ॥४२७॥ दुःखप्रतिक्रियाः कामाः, शैत्यादिसाधना यतः। स्वाभाविकी पराशान्तिः, किं जीवमवमन्यते ॥४२८॥ नासर्वज्ञाक्षनिवृत्त्या, स्यादभावोऽर्थगोचरः। नान्धा दृष्टया जगच्छून्यं, किं जीवमवमन्यते ॥४२९॥ प्रवीणो योऽर्थज्ञाने स्याच्चं निषेद्धुं तु स क्षमः। सन्तं जीवमजानानः, किं जीवमवमन्यते ॥४३०॥ स्पर्शवर्णरसातीतं, योऽर्थं ज्ञातुं क्षमो नहि। स्पर्शादिगोचरातीतं, किं जीवमवमन्यते ॥४३१॥ कथं ज्ञानं किमाधारं, कश्च हेतुश्चलाचले। अतोऽत्रालम्ब्य धृष्टत्वं, किं जीवमवमन्यते ॥४३२॥ परीहारे हि पापानां, हानिः कापि न सन्नृणाम्। अत्यजन् गर्तसम्पाती, किं जीवमवमन्यते ॥४३३॥ गर्भकालात् सुखं दुःखं, वेदयन् विविधं जनः। कर्मणोऽगात्फलमिव किं जीवमवमन्यते ॥४३४॥ पश्येन्नाजो यथा व्याघ्रं, म्रियते किं न तावता?। मोक्षानीक्षणतो नाघात्, किं जीवमवमन्यते ॥४३५॥ तप्तायसीं भयस्थानं, गणयन् वृक्षसाक्षिवत्। साधयन्नास्तिको जीवं, किं जीवमवमन्यते ॥४३६॥ निषेधको न विश्वेऽस्ति, विश्वे जीवात्परः पुनः। भूत्वा निषेधको धृष्टः, किं जीवमवमन्यते ॥४३७॥ तनुक्षितेः परं तत्त्वं, न कामेषु विवेकिनां। सुखं कण्डूयनाभं तत्, किं जीवमवमन्यते ॥४३८॥ तपो रोगविनाशाय, सहिष्णुत्वाय शान्तये। धातूनां तद् भुवन् दुःखं, किं जीवमवमन्यते ॥४३९॥ आत्मानमननुकृत्या येऽभ्युपगम्यापि सर्वगम्। मन्वानाश्चेतनां देहादित्याख्यान्तो हि नास्तिकाः ॥४४०॥ ज्ञानस्थानात् परे स्थाने, किं नु स्मृत्यादि दृश्यते?। प्रेत्य गन्ता क आगन्ता, कथं वा मृतिरात्मनः? ॥४४१॥ कर्मोदयानुभावेन, जीवाजीवप्रवर्तनं। लेष्टुघाते मृते मर्त्ये-किं लेष्टौ कर्मविक्रिया? ॥४४२॥ आदर्शेऽसन्निकृष्टानां, छाया बुधैर्नु दृश्यते। दूरस्थमय आकर्षन्नयस्कान्तोऽपि किं नहि? ॥४४३॥ सर्वे सर्वत्र चेज्जीवाः, कस्य किं कर्म किं फलं?। चित्ताद्यपीह दुस्थं स्यादात्मनीष्टं मते विभोः ॥४४४॥ आत्मन्यवयवोपेते, कथमक्षेषु सङ्क्रमः। ज्ञानाज्ञानान्वयात्किं न, मान्यो विरोधिसङ्करः ॥४४५॥ ज्ञानादीनां गुणानां तत्स्थानां कर्मक्रियावतां। परिणामभुवां ज्ञानं, कथमज्ञात आत्मनि ॥४४६॥ अतीन्द्रियार्थवेत्ता योऽसावात्मानं वदेद्दतं। तद्वेत्ता निर्गतो मोहाद्रागद्वेषमयाज्जनः ॥४४७॥ मोहरागद्विडाक्रान्तो, घनं कर्म प्रतिक्षणं। समादत्ते न



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चाप्नोति, सार्वज्ञ्यं वीतकल्मषम् ॥४४८॥ अतः सर्वज्ञमूलं स्यात्, सत्यमात्मादिगोचरं । तथाभूता न ये ते न, सत्यात्मादिप्ररूपिणः ॥४४९॥ अशरीरे न सार्वज्ञ्यं, संयमादि न तद्विधे । शरीरं नाऽस्त्यबन्धस्य, वृथाऽनादीशकल्पना ॥४५०॥ सिद्धो बुद्धो विमुक्तश्चेति प्रत्यर्थिभुवो गिरः । बन्धो ज्ञानादिभिर्नाश्यो, वृथाऽनादीशकल्पना ॥४५१॥ समानेपि च जीवत्वेऽनादिशुद्धाः परे न किं ? । ज्ञानादिलक्षणाः सर्वे, वृथाऽनादीशकल्पना ॥४५२॥ सर्वज्ञोऽसाविति प्रोक्तं, सर्वज्ञेनेतरेण वा । द्विधाऽपि, सार्वतोत्पादो, वृथाऽनादीशकल्पना ॥४५३॥ आत्माद्यतीन्द्रियार्थानां, देष्टा सर्वज्ञतायुतः । न चेद् व्यर्थानि शास्त्राणि, वृथाऽनादीशकल्पना ॥४५४॥ देष्टा मुखेन सहितो, मुखं तनुयुजस्तनुः । नाकर्मणो न सोऽबन्धो, वृथाऽनादीशकल्पना ॥४५५॥ कालस्यानादितां श्रित्वाऽनन्तता परमेष्ठिनां । पूर्वे पूर्वे हेतवोऽमी, वृथाऽनादीशकल्पना ॥४५६॥ बन्धोऽपि कर्मणोऽनादिः, कृतको वर्तमानवत् । साधनादी व्यक्तिवाहौ, वृथानादीशकल्पना ॥४५७॥ अकर्मणोऽपि बन्धश्चेत्, सिद्धेऽनाश्वास आदरः । न धर्मे कर्मणोऽहेतोर्वृथानादीशकल्पना ॥४५८॥ नाबन्धस्योदयो नैवानुदये कर्मबन्धनं । निर्बन्धोऽतः शिवेऽयोगो, वृथाऽनादीशकल्पना ॥४५९॥ विना धर्मेण सिद्धिश्चेद्, वृथा धर्मार्थिता नरे । सद्धर्मेणैव सिद्धिश्चेद्, वृथाऽनादीशकल्पना ॥४६०॥ सद्दग्बोधसुवृत्तानि, सिद्धेर्हेतुर्यदा मतः । तान्येवादृत्य सिद्धिश्चेद्, वृथाऽनादीशकल्पना ॥४६१॥ कर्तृहीनं न कर्म स्यान्न कर्ता कर्मवर्जितः । बीजाङ्कुरे यथाऽनादे वृथाऽनादीशकल्पना ॥४६२॥ आत्मा ज्ञानगुणो द्रष्टा, सुखदुःखविमुक्तिमान् । युक्तो दृष्टया प्रवृत्त्या चायुस्तनू गोत्रदानयुक् ॥४६३॥ आत्मानमष्टधा कर्म शान्तेरुदयाच्च सत्फलं । सर्वाण्यप्यविशेषेण, नाशयित्वा शिवं व्रजेत् ॥४६४॥ अज्ञानाः कर्मभेदानां, गुणाना- मात्मभाविनाम् । अवित्त्वा तत्क्षयोपायं, कथमाप्स्यं सिद्धिगाः ॥४६५॥ सिद्धौ जिगमिषा येषां, ते प्राक्तत्प्राप्तिनिश्चयाः । चरमार्धे गते व्रते, निश्चितिरेवमङ्गिनाम् ॥४६६॥ सिद्धिरेव जगत्यर्थो, तापरः परमार्थभाक् । विहायैनां च तन्मार्गं, जगत्सर्वं भयं मनेत् ॥४६७॥ सिद्धयर्था साधनान्यस्या, बाधकानि च श्रीप्सति । ज्ञात्वाश्रवबन्धौ तुष्टो, यमे तपसि वर्तते ॥४६८॥ एवं च ज्ञानदर्शनचारित्रैरात्मशुद्धिमान् । ज्ञानघ्नादीनि हत्वा सोऽरागः केवलमाश्रयेत् ॥४६९॥ द्रव्याध्वकालभावात्मा, सर्वोऽ



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्थस्तेन युज्यते । मानाधीना मेयसिद्धिस्तस्मिन्नैवोपपद्यते ॥४७०॥ दूरमन्तं रूप्यरूपि, निष्प्रदेशं प्रदेशयुक् । भूतं
भवद्भावि द्रव्य-मनेनाशेषमीक्ष्यते ॥४७२॥ स्वरूपस्य पदार्थानां, केवलेनावबोधनात् । साक्षाद् दृष्ट्वात्मादिसार्थं,
सेष्टे वक्तुं तु सूनृतम् ॥४७२॥ यथार्थं चेत् पदार्थानां, विना केवलसंविदं । स्वरूपमेव बुद्धं न, सत्योद्यत्वं
मरीचिका ॥४७३॥ बाला मूयुर्यथाऽज्ञानाः, सत्यवादाभिमानिनः । अवीतरागासर्वज्ञास्तथा मोक्षाध्वदेशकाः
॥४७४॥ धृष्टतां परमां श्रित्वा,छाद्मस्थ्येन मलीमसाः । आत्माद्यर्थानज्ञात्वापि, भवन्ति मार्गदेशकाः ॥४७५॥
रूपस्पर्शादिविकलो, नह्यात्मेन्द्रियगोचरः । केवलेन विनैतेषां, देशना ध्यान्ध्यमेव हि ॥४७६॥ आसतामात्ममु-
ख्याना- मिन्द्रियातीतमूर्त्तिनाम् । असत्यान्यणुमुख्यानां, रूपं वितथमुच्यते ॥४७७॥ अनन्त अणवः सूक्ष्माः,
सूक्ष्मे दृश्ये न सम्मताः । षष्टिंत्रिंशतमंडंशं तं, धृष्टत्वेन न्यवेदिषुः ॥४७८॥ न वर्गणा विदुस्तेऽष्टौ, पृथ्व्या-
दींस्ते पृथग् जगुः । बाला अप्यधुना वायोरपां च विदुरेकताम् ॥४७९॥ प्रदेशोऽभ्रस्य कालस्य, समयः सौक्ष्म्यतो
मतः । न यैर्ज्ञप्तेरभावेन, ते किं सर्वज्ञताभृतः ? ॥४८०॥ जगत्सर्वे शुभां वाचं, स्वस्मिँल्लात्यतथादृशं ।
सर्वेऽप्यात्मसु सार्वज्ञ्यं, लान्त्यल्पज्ञतमा अपि ॥४८१॥ रागो द्वेषो महामोहस्त्रयोऽप्येते सुदुर्जयाः । वैराग्येण
जयस्तेषां, तच्च दुर्लभमङ्गिनाम् ॥४८२॥ अनिर्जित्य महामोहं, सार्वज्ञ्यं न श्रयेज्जनः । नाविभाते विभाते स्या-
ज्ज्ञानोदयसम्भवः ॥४८३॥ असर्वज्ञो जनो भूयान्, सर्वसत्याभिमानवान् । दुर्लभं तत्त्वसज्ज्ञानं,
तेन सत्यं सुदुर्लभम् ॥४८४॥ दुर्लभे तत्त्वसज्ज्ञाने, सत्यधर्मनिरूपणं । दुर्लभं तेन जीवानां, दुर्लभा शुद्धधर्मवाक्
॥४८५॥ सद्धर्मश्चेच्छ्रुतो नेतो, धर्मनाम्ना जनो भ्रमेत् । सूक्ष्मबुद्ध्या ततो धर्म, परीक्षेत हितावहम् ॥४८६॥ न
ह्यन्येन परीक्ष्यं स्यात्, सद्रत्नं भुवि दुर्लभं । सूक्ष्मबुद्ध्या विना धर्मो, न परीक्ष्यो नृणां भवेत् ॥४८७॥
शाकेऽपरीक्षिते घस्रं, धान्ये मासोऽंशुके ऋतुः । दारेषु जन्म धर्मे तु, भवाः सङ्ख्यातिगा वृथा ॥४८८॥
दारेष्वर्थे गृहे धान्ये, क्षेत्रे वादाः सुनिर्णयाः । धर्मे वाद्च्छिदाऽरक्तेऽद्विष्टे सा दुर्लभा दशा ॥४८९॥ त्यज्यते
स्वजनं लोकैः, सुरातिसम्भवं सुखं । दुर्धर्मेण कृतो वासो, न गच्छति भवान्तरे ॥४९०॥ तथाभव्यत्वपाकश्चे-
जीवे कालादिभिर्भवेत् । स्वभावतस्तदा सत्यं, धर्मं रोचति नान्यथा ॥४९१॥ यत्रेनिपुणानां बालां न तत्र



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्याद्विवादनं । जातेऽस्मिंश्छेद्यते शीघ्रं, नैवं धर्मविवादनम् ॥४९२॥ भूयांसो धार्मिका वादा, असत्याः सत्यरूपिणः । धर्मा यतो महार्घे यदनुकार्ये च भूरि तत् ॥४९३॥ परीक्षा दुर्लभा तत्र,सर्वे यद्धर्मवादिनः । आग्रहैकच्छदस्तत्त्वात्, सत्यो धर्मः सुभाग्यतः ॥४९४॥ परेशा धृष्टतां धृत्वाऽज्ञात्वा जीवान् स्वरूपतः । लोकहेर्या त्रसान् जीवानाहुर्न स्थावरान् पुनः ॥४९५॥ अब्धिमुपेक्ष्य बिन्दुं य, आख्यातीह नरो यथा । तथाऽनन्तानुपेक्ष्यामी, स्तोकानेव जगुस्तकान् ॥४९६॥ क्षित्यप्तेजोमरुद्वानान्, सद्वित्रिचतुःपञ्चखान् । जीवान् जीवतया प्राहुर्ये सर्वज्ञा यथार्थतः ॥४९७। जीवान्मत्वा त्रसांस्तेऽपि, नोचुर्धर्मं त्रिधाऽमलं । शुद्धः कषेण भेदेन, तापेनाचारमार्गगः ॥४९८॥ जीवानामुपकारः स्यात्, पारम्पर्यात् परस्परं । तदुपेक्ष्य वचोऽधर्म्यं, जीवो जीवनमित्यगुः ॥४९९॥ त्रसानामपि रक्षायै, नोपकरणानि चक्षिरे । रजोहृत्यादिकान्येभिः, सम्भवोऽस्याः कथं भवेत् ? ॥५००॥ जीवरक्षाविधिर्नोक्तः, प्रमार्जनमुखोपि यः । नेर्यासमितिप्रमुख, आचारोपि निदेशितः ॥५०१॥ हिंसाकारिषु येऽनर्था, दयाकारिषु ये गुणाः । न तन्निन्दाप्रशंसार्था, दृष्टान्तास्तैश्च नोदिताः ॥५०२॥ भिन्नाभिन्ने तनोर्जीवे, हिंसाहिंसादिसम्भवः । नित्यानित्येऽविभौ जीवे, श्वभ्रादिगतिसम्भवः ॥५०३॥ शुद्धं स्वर्णं भवेत्तापात्, तथाऽर्थाः स्याद्विरः पुनः । कषश्छेदो न तापोऽस्ति, लेशतोऽपि कुतीर्थिनाम् ॥५०४॥ योग्य आचारधर्माय, स यस्य स्यात् कुटुम्बिके । गुणा न्यायार्जितार्थाद्याः, पञ्चत्रिंशत् सुभूमवत् ॥५०५॥ स्वयं चाक्षुद्राद्यैः स्यादेकविंशतिसद्गुणैः । अलङ्कृतो यथा क्षेत्रं, निम्नोन्नत्यादिवर्जितम् ॥५०६॥ दानशीलतपोभावा, बीजं धर्ममयं शुभं । लोभेच्छाभीकुचिन्तानां, व्यवच्छेदाद्धितावहम् ॥५०७॥ मिथ्यादृष्टयुद्भवत्कर्म, सम्यग्दृष्ट्या निरुध्यते । तथैवाव्रतसम्भूतं व्रतादानेन रुध्यते ॥५०८॥ पापस्थानानि सम्यक्त्वात्, पापस्थानतया भनेत् । निरोद्धव्यानि धर्मायाशक्तः स्थूलान्यपि त्यजेत् ॥५०९॥ चिन्तयेदात्मनाऽजस्रं, सम्यग्दृष्टिः स्थिराशयात् । प्रार्थ्ये शिवं तदध्वा तु, शुद्धे संवरनिर्जरे ॥५१०॥ वीक्षेत प्रत्यहं जीवं, संवृतं तपउद्यतम् । सुमार्गगं तथा च स्यात्, कायपाती भवावटे ॥५११॥ भव्यत्वपरिपाकेन, ऊर्ध्वं यात्येनसः क्षयात् । सम्यक्त्वज्ञानचारित्रं, शुद्धाच्छुद्धतमं भजेत् ॥५१२॥ जीवाजीवाश्रवबन्धान्, संवरं निर्जरां शिवं । तत्त्वानि लघुकर्माङ्गी, श्रद्दधीताप्तवाक्यतः ॥५१३॥ सूक्ष्मबादरभेदेनानन्तप्रत्येकभेदतः । ग-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिवेदकषायाद्यैरङ्गिनो विविधा भुवि ॥५१४॥ जीवानां पुद्गलानां च, योगाद्धर्मादिवस्तुनः । कालपुद्गलजीवानां,
षट्कं द्रव्येषु सिद्धयति ॥५१५॥ सकषायाकषायाणां, ज्ञानघ्राद्यष्टकर्मणाम् । मनोवाक्कायजाद्योगादाश्रवो बन्धभू-
मिका ॥५१६॥ कर्माणूनां गृहीतानां, क्षीरनीरवदात्मनि । मिथ्यात्वाद्यैरसं कालं, बन्धो निर्धार्य बन्धनम् ॥५१७॥
आगच्छत् कर्म रोद्धव्यं, धर्मैः क्षान्त्यादिभिः सदा । विविधं च तपः कृत्वा, क्षेयं प्राग्बद्धकर्म तु ॥५१८॥ संसा-
र आर्तरौद्राभ्याम्, धर्म्यशुक्ले शिवाप्तये । सदानन्दचिदापूर्णं, शिवं जन्मान्तकोज्झितम् ॥५१९॥ एषाऽमला स-
प्ततत्त्वी, पुण्यपापे तु साधने । श्रद्दधाति नरो ह्येवं, स्वभावाद्वा गुरोर्गिरा ॥५२०॥ मतिश्रुतावधिमनः- पर्याय-
केवला चिरः । क्रमो (तासु)त्तरं श्रुतं लब्ध्वा, चारित्रेण शिवं व्रजेत् ॥५२१॥ येऽमुं मार्गं न बुद्धास्ते, जगुः
शीलं श्रुतं द्वयम् । प्रधानगौणभावेन, हाऽज्ञानां, कतमा दशा? ॥५२२॥ वृत्तिरारोग्यमर्थाप्ति-स्तीरं राज्यं ज-
यो यशः । न केवलेन वृत्तेन, ज्ञानेनान्यतरेण वा ॥५२३॥ ये केवलेन बुद्ध्वैवं, सत्यं धर्मं फलान्वितम् । उत्त-
मोत्तमतां प्राप्ता- स्ते लोकेभ्यो जगुस्तकम् ॥५२४॥ सूक्ष्मान्तरितदूरार्थाञ्जानीते केवलात्मना । सत्यांस्तत्केवलं
राग-द्वेषाशुचिपरिक्षयात् ॥५२५॥ सर्वेऽपि वादिनः स्वेशान्, सर्वज्ञान् सत्यवादिनः । ऊचुः परं द्वयं तत्स्या-
च्छुचावात्मनि नापरे ॥५२६॥ मालिन्यापगमः शौचं, द्वयमापेक्षिकं त्वदः । एको मलो न सर्वेषां, शौचमेकं
भवेत्कथम्? ॥५२७॥ ज्ञानघ्नादीनि कर्माणि, चिदानन्दमयात्मवः । मलं तस्य तु शौचं स्या-दव्यये संस्थितिः
पदे ॥५२८॥ रागद्वेषौ चारित्रे, ज्ञाने विस्मरणादिकम् । सम्यक्त्वे संशयाद्याश्च, मलो नाशे तु शौचता ॥५२९॥
दुर्लभं ज्ञानमर्थानां, सत्यं तत्रापि देशना । शौचेनैव यथाज्ञात-मशौचो विपरीतवाक् ॥५३०॥ सत्यवादैषिणा
कार्यं, पुरः शौचे परीक्षणम् । दोषा अष्टादशापेता, यस्मात् स परमः शुचिः ॥५३१॥ मलाः सत्येऽज्ञता क्रोधो,
मानः शाठ्यं लुब्धिर्मदः । रागोऽरागःस्वपिः शोकोऽलीकं चौर्यं भयं वधः ॥५३२॥ मात्सर्यं प्रेम रमणं, हास्यमेते
मृषाखनिः । नर्यैतद्रहिते सत्यं, तद्वान्नापूज्यतां व्रजेत् ॥५३३॥ एवं सर्गस्थितिप्रान्तैर्भाषयित्वा मृषा जनम् । ई-
श्वरत्वं समाम्नान्ति, नैभ्योऽशौचोऽपरो भुवि ॥५३४॥ न समक्षं परेषां स्यात्, स्त्रीसङ्गी नर उत्तमः । ये तु
मूर्त्तिं स्त्रिया युक्तां, स्थापयन्ति स्वकां मलात् ॥५३५॥ तादृक्प्रेमरसा रक्ता, अर्हेयुः सार्वतां कथम् । आत्माद्य-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

P. 104

तींद्रियार्थानां, कथं सत्यप्ररूपकाः ? ॥ ५३६ ॥ स्वां मूर्त्तिं शस्त्रमालाङ्कां, रागद्विड्मोहसूचिकां । स्थापयन्ति कथं शौचं, सत्यार्थानां प्रशासने ? ॥ ५३७ ॥ आरम्भार्थेषु ये सक्तास्ते किं सत्यानुवादिनः ? । यद्वा तद्वा जना किं न, ख्यान्ति स्वार्थैकतत्पराः? ॥ ५३८ ॥ अत एवोच्यते सद्भि-र्नाशीलो ज्ञानवानपि । उपजीव्यो जलापूर्णो, यथा नीचैः श्रितोऽवटः ॥ ५३९ ॥ शुचिः स एव धर्मः स्याद्, यत्र शास्त्रेरिता क्रिया । मैत्रीप्रमोदकारुण्य-माध्यस्थ्येन विभूषिता ॥५४०॥ देवपूजा गुरूपास्तिः, सा शुचिस्तद्गुणाश्रया । या संयुक्ताऽऽन्तरभक्त्या, सत्काले मोक्षहेतवे ॥ ५४१ ॥ वृत्तिर्न्यायागतैर्द्रव्यैरन्यावञ्चनयुक् क्रिया । अन्त्यापकारवियुता, चिन्ता धर्मार्थिनः शुचिः ॥ ५४२ ॥ शुचिर्या देहवस्त्रादेस्तन्नैर्मल्याय धार्यते । सा लौकिकी यतो नैषा, पापनाशाय युज्यते ॥ ५४३ ॥ यद्यात्मा शुचितां यायाद्रागादिमलवर्जितः। यथास्थं बुध्यते पृथ्व्यादीनां भावाननीश्वरान् ॥ ५४४ ॥ अभ्रायोगारताम्राद्याः, स्वस्वस्थानसमुद्भवाः । काष्ठादग्निर्मरुद्भ्योऽम्बु वृक्षाद्याकर्षणोद्भवाः ॥ ५४५ ॥ शुचिरात्मा कथं दुःखसुखे स्वप्राच्यकर्मजे । भाविन्यौ पुण्यपापोत्थे, गती चेशं निमीलयेत् ॥ ५४६ ॥ ईश्वरः सर्वजन्तूनां, जीवादीनि प्रकाशयेत् । सूर्यवज्जन्तवस्त्वस्माद्धेयादेये प्रवर्तकाः ॥ ५४७ ॥ एवं कर्मापगमतः, शौचोऽङ्गी सत्यवाग्रतः । लोकानां पुरतः सत्य-मेवाख्याति न चेतरत् ॥ ५४८ ॥ ज्ञानघ्नादष्टनाशेन, जीवे ज्ञानं यथा स्फुरेत् । चारित्रमोहनाशेन, देही चारित्रवान् भवेत् ॥ ५४९ ॥ कैवल्यं गृहिलिङ्गस्था, आप्य चारित्रमिश्रति । केवली भरतः शक्रेणार्चितश्चरणं श्रितः ॥५५० ॥ शुचितां प्राप्य सर्वेऽपि, संयमाध्वनि गत्वराः । भवन्ति निर्मले हेम्नि, कालिमा स्यात् किमंशतः ? ॥५५१॥ आत्मज्ञाननिलीनानां, कर्त्तव्यं नावशिष्यते । वागियं ज्ञानपापानां, स ज्ञानी फाल्गुनोऽभवत् (कः) ॥ ५५२ ॥ ज्ञानिनःसंयमे मग्ना, आश्रवेभ्यस्तु निर्गताः । नोच्छृङ्खलो भवेज्ज्ञानी, संयमो ह्यात्मरक्षकः ॥ ५५३ ॥ संयमः सप्तदशधा, पृथ्वीरक्षादिसाधनैः । हिंसा यत्सर्वपापेषु, प्रथमं पदमश्नुते ॥५५४॥ चरंस्तिष्ठन् समासीनः, शयानोऽश्नन् वदन् नरः । जीवरक्षापरः स्याच्चेल्लेशेनाघं न गच्छति ॥ ५५५ ॥ रक्षायां निरपेक्षो यः, स हिंस्रोऽहिंसकोऽपि सन् । बध्नीयाच्चिक्कणं पापं, पाके यस्य फलं कटु ॥ ५५६ ॥ निर्विकल्पदशोपेतो, जिनः केवलितां धरन् । संयमायैव तत्याजा-न्धःसदोषं न किं प्रभुः ? ॥ ५५७ ॥ स आत्मा संयमी यः स्याद्धिंसादिभ्यो निवृत्तिमान् । योगाक्षगोप



P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

को भूत्वा, कषायांश्चतुरस्त्यजेत् ॥५५८॥ जीवो गृह्णाति योगेभ्योऽनुक्षणं कर्मसंहतिम्। संयमेन विशुद्धात्मा, तत्रैव तां
विनाशयेत् ॥५५९॥ यथाख्याते स चारित्रेऽधिगते नैति बन्धनम्। अवेद्यं कर्म तदपि, वेद्यं समयमात्रगम् ॥५६०॥ चारि-
त्रमोहनाशेन,, चारित्रं परमं भवेत्। परमः संयमस्तु स्या-दयोगे :योगरोधनात् ॥५६१॥ मोक्षमार्गतया प्रोक्तं, चारित्रं
धर्ममहर्षिभिः। मार्गः साधनमित्येवा-भिप्रेत्य न तु साध्यताम् ॥५६२॥ संयमोऽयोगपर्यन्तोऽयोगश्च द्विविधो
मतः। आद्योऽयोगो भवस्थानां, सिद्धानामपरः पुनः ॥५६३॥ समानेऽपि च जीवत्वे, सिद्धानां नहि बन्धनम्
योगातीतदशैषां, सदा संयमसिद्धितः ॥५६४॥ चारित्रस्य प्रतिज्ञाऽभूत्, तच्च सामायिकादिकम्। भवान्तेन स-
मं साऽगात्, तत्सिद्धो न चरित्रवान् ॥५६५॥ अचारित्रा च या वृत्तिः, कर्मौघस्य निबन्धिनी। न सा सिद्धेऽत
उक्तोऽसौ, न युक्तो नाऽप्ययुक्तकः ॥५६६॥ जीवाजीवात्मकं तत्त्वं, नैतद्भिन्नं जगत्त्रये। सप्ततत्त्वी तथाप्युक्ता
हेयादेयप्रसिद्धये॥ ५६७॥ परमार्थेन मोक्षस्तू -पादेयोऽत्र शरीरिणाम्। परं न स स्वरूपेण, सिद्धो यद् गृह्यते
नहि ॥ ५६८॥ प्रतिबन्धक्षयादात्म- स्वरूपं प्रकटं सदा। सैष तज्ज्योतिरिव तु, दीपकायात् स्वयं भवेत् ॥५६९॥
अभावः प्रतिबन्धानां, गुणसङ्घातघातिनां। नवागमानां रोधे स्यात्, क्षयोऽपि तत्त्वतस्ततः ॥५७०॥ समुच्छिन्नक्रिया-
ध्यानाद्, गुणस्थाने चतुर्दशे। सर्वान्त्यकर्मनाशेऽपि, तदयोगीति कथ्यते ॥५७१॥ संवरात्मा सरोधः स,
उत्कृष्टः संयमः पुनः। तत्त्वतः सप्ततत्त्व्या या, कथा सा संयमार्थिका ॥५७२॥ रत्नत्रयी समादेया, सम्य-
क्त्वाद्या मता श्रुते। युज्येते निश्चितौ बोधे, द्वे आद्ये व्यापृते न च ॥५७३॥ प्रतिबन्धनिरासेऽन्त्यो, व्यापारः संयमाश्रिता।
तपो बलं संवृतेर्यदन्यथा गजधावनम् ॥५७४॥ तथाच साधनं मुक्तेः संयमः परमं मतम्। साधवोऽप्यत
उच्यन्ते नम्याः संयमिताधराः (नामतः) ॥५७५॥ विहरन्तः समे प्रोक्ताः, संयमेनैव भाविताः। साधवो मोक्षमार्ग-
स्य, स्वपरैर्यै प्रसाधकाः ॥५७६॥ यद्यप्यात्मगुणो ज्ञान मुत्तमं स्वस्वभावतः। परं जन्तुभिरादेयं, हेयादेय-
प्रसाधनात् ॥५७७॥ कण्टकादिं प्रपश्यन्तो, हानादानोद्यता नहि। चेत् तद् वृथा दर्शनं त-द्वन्धान्नहि विशिष्यते ॥५७८॥ ॥२६॥
अत एव नयद्वारे, यतितव्येन देशना। उपादेये च हेये च, तज्ज्ञानं संयमात् फलि ॥५७९॥ चतस्रो गतयो
ज्ञान-दर्शनक्रन्दुसङ्गतः। मुक्तिर्न तासु यत्तासु, नहि सर्वासु संयमः ॥५८०॥ सञ्ज्ञिपञ्चाक्षतिर्यञ्चोऽन्त्ये प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्याख्यान्ति पाप्मनाम् । स्थानानि न परं तेषु चारित्रे स्वीकृतिर्ननु ॥५८१॥ संयमः सच्चरित्रे स्यात्, संयमोपकृतिर्मता । रजोहृत्यादयो यस्मात्, सिद्धिलिङ्गात्स्वलिङ्गता ॥५८२॥ न चेदुपकृतिर्धार्या, नोपकार्यस्तु संयमः । नग्नाटोऽत मतः शास्त्रे, सर्वसंवादनिर्गतः ॥५८३॥ लिङ्गसाधर्मिकाः सर्वे, साधवो यत् समेत्विमे । रजोहृत्यादिलिङ्गं तत्संयमस्यैव बिभ्रति ॥५८४॥ ज्ञानाद्युत्पत्तिहेतौ चेदात्माऽन्वहमुदीर्णधीः । रक्षेत् परेषां न ध्वंसेज्ज्ञानाद्यात्मगुणान् सुधीः ॥५८५॥ ज्ञानादिमन्त आत्मानो, रक्ष्या हिंस्याः क्वचिन्नहि । तदर्था योगवृत्तिर्या, सैव संयम उच्यते ॥५८६॥ परेषां ये गुणान् घ्नन्ति, ज्ञानाद्यान् देहिनां नराः । बध्नन्ति कर्म तद्घ्नं ते, मुच्यन्ते रक्षणात्ततः ॥५८७॥ शय्यम्भवैरतः सूत्रे, भाषितं दशकालिके । सूरिभिर्धर्महेतूनां, मध्ये संयमनं परम् ॥५८८॥ संयमस्योत्तमत्वेन, दीक्षाकल्याणकं मतं । जिनानां वार्षिकं दान-मुत्सवश्च तदाश्रितः ॥५८९॥ मोक्षस्याव्याहतोऽध्वाऽयं,जिनाः सर्वे ससंयमाः । ध्रुवं स्वलिङ्गसिद्धास्ते, नान्यलिङ्गाः कुलिङ्गिनः ॥५९०॥ संयमस्य ग्रहस्तीर्थमिति लोकान्तिकाः सुराः । जिनं तीर्थं प्रवर्तस्वेत्याहुर्दीक्षामहे स्फुटम् ॥५९१॥ संयमो जगतस्त्राणमिति संयममाचरन् जन्माद्यार्तमिति ध्यात्वा, शमाय जिनदीक्षणं ॥५९२॥ हत्वा बाह्यान् यथा शत्रूनान्तरान् शोधयेन्नृपः । बाह्यान् कर्मरिपून् साधुः, शोधयित्वा तपश्चरेत् ॥५९३॥ बाह्यैरप्युच्यते शास्त्रे, तपः कर्मविशुद्धये । इतित्र पुरा बद्धं, कर्मतैं तप उज्झ्यते ॥५९४॥ मिथ्यात्वादिप्रभावेन, कर्म जीवेन प्राक् सितम् । परं तदागतं योगैस्तत्तपो योगसंश्रितम् ॥५९५॥ तप्यन्ते तपसा योगा, इति नेह विवादनम् । तप्तैस्तैः कर्मणां तापो, जीवे स्था स्नूनि यत् समम् ॥५९६॥ हेम्नि लग्नो मलो ज्वाला-नलयोगेन नश्यति । आत्मलग्नं तथा कर्म [illegible] नलो धमेत् ॥५९७॥ आत्मनस्तपनाद् भीतो, जहौ तपनबन्धुरः । तद् दुःखमित्युदीर्यागान्नदीनीरञ्जनाजलम् ॥५९८॥ संयमस्यातिशैथिल्यान्मायासूनुर्हतोऽमुना । नन्दामासाद्य नाश्यं स, बोधिप्रातेरनाटयत् ॥५९९॥ तपःसंयमभ्रष्टं तं,ज्ञात्वा सहायकाः जहुः । भिक्षवः पञ्च ये ह्यासन्, संयमे तपसि स्थिताः ॥६००॥ तपो दुःखमिति त्याज्यं, ज्ञानं ध्यानं च ग्राह्य किम् । योगेषु त्रिषु तनुते, न दुःखं ? क्लीवदुर्जयम् ॥६०१॥ शान्तात्मनां न तैर्दुःख-मिति चेन्मुक्तिगामिभिः । न बलात् क्रियते, ह्येतत्, कस्याप्यात्मबलोद्धुरैः ॥६०२॥ तस्य विघ्नो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दयो श्रः स्यात्तदन्वेषणतत्परः । ब्रह्मचारी संयमी च, नैव भोगादिविघ्नभुक् ॥ ६०३ ॥ ज्ञात्वाऽहानिमिन्द्रियाणां, योगी ध्याने शुभे स्थितः । यथाशक्ति तपः कुर्वन्, क्षिणोति कर्म काचितम् ॥ ६०४ ॥ तपो नियामकं तन्व इन्द्रियाणां च यन्मनः । प्रवृत्तमपि सद्ध्याने, समाकर्षन्ति तान्यलम् ॥ ६०५ ॥ क्रोधो मदो भयं लोभो, धार्यन्ते मनसि ग्रहात् । तन्विन्द्रियाणि गृह्णन्ति, मनस्तद्वारकं तपः ॥ ६०६ ॥ पापाः किमु समे जाता,? बुद्धे किं बुद्धता, जनौ । वीतरागस्य नो जन्मेति श्रुतं सर्वपार्षद्म् ॥ ६०७ ॥ रागद्वेषमहामोहा-पूर्णो जन्तुः प्रजायते । तपसा ज्ञानदृग्वृत्तयुजा दग्ध्वाऽमलो भवेत् ॥ ६०८ ॥ जीवेन पुद्गलासक्त्याऽज्ञानाद् बद्धं पुरा घनम् । प्राताङ्गपुद्गलेऽमोहात्तपसा किं न दह्यते ? ॥ ६०९ ॥ शान्तं दान्तं मनः कर्म, ध्यानेन क्षिपति क्षणात् । तपसा शान्तदान्तं किमङ्गं तत्रापराध्यति ? ॥ ६१० ॥ शरीरेण सुदान्तेन, मनो दान्तं न चान्यथा । किमु आरण्यगो गौः स्यात्, क्वापि धर्तुं धुरं क्षमः ॥ ६११ ॥ शरीरेण न सोढा चेद्दुःखं कथं वशे मनः । वशे मनसि कः कायदुःखादुद्विजते जनः ? ॥ ६१२ ॥ भीतश्चेत्त्वं कायकष्टाद्, ध्यानं किं तव सुन्दरम् नो चेत्तु तपसा किन्तु, कष्टरूपेण साध्वसम् ॥ ६१३ ॥ तपसो भीरुतां धृत्वा, श्रिते ध्यानेपि सा दृढा । उष्ट्रवाक्यान्निषिद्धो ना, प्राक्तमेवानुधावति ॥ ६१४ ॥ शस्तं ध्यानं तदेव स्याद्, यत्र भयकर्णिका नहि । कायदुःखतपस्त्रस्तोऽर्हसि ध्यानं कथं शुभम् ? ॥ ६१५ ॥ केवलं कायदुःखेन, कुत्रोक्तं तप आगमे? । योगेन्द्रियकषायाणां, लीनताऽप्यागमे तपः ॥ ६१६ ॥ विविक्तशय्यासनिको, गोचरादक्षसंयमी । ध्यानार्हश्चेत्कथं चैषाऽवस्था सौख्येम गम्यते ? ॥ ६१७ ॥ यथा भटो रणं यास्यद्विविधार्तिसहो भवेत् । कर्मभूपजयार्थी सन्, तपसा किं न भाव्यते ? ॥ ६१८ ॥ दुःखस्योरो ददद् योधः, शस्त्रास्त्रबलधारकः । शत्रुसैन्यं पराजित्य, लभते निर्मलं जयम् ॥ ६१९ ॥ परीषहोपसर्गाणां, तपसश्च व्यथां दधत् । ध्यानसंयमशस्त्रास्त्रो; जित्वा कर्म शिवं व्रजेत् ॥ ६२० ॥ अनभ्यासी यथा योधः, क्लीबः शत्रोः समागमे । तथाऽदान्ततनुः साधुः, क्लीबो व्याधिसमागमे ॥ ६२१ ॥ नराणां मरणोपाग्रे, यद् दुःखं तद्वचोऽतिगम् । अनभ्यस्ततपःकष्टोऽरेऽरेऽरे शब्दमुच्चरेत् ॥ ६२२ ॥ ध्यानं चेत् स्वकृते सौस्थ्यात्तपः कष्टेन निश्चलम् । व्याध्यातंकोत्थिते दुःखे, कथं स्थाता स्थिरतात्मधीः ? ॥ ६२३ ॥ सोढव्यं कर्म

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्जं दुःखं, तपसा क्षपयेन्नहि । अभीता दुर्गतिस्तर्कि, तां गते न करिष्यति ॥६२४॥ कर्मणः कर्ममूलत्वात्सदनादेर्भवत् पुनः । अक्षस्य पुरतो वृद्धं, कथं भोगेन नश्यति ? ॥६२५॥ भोक्तव्यं यत्कृतं कर्मावश्यं भोगो द्विधा पुनः। रसप्रदेशभेदाभ्यां, रसस्य तपसा क्षयः ॥६२६॥ अपथ्ये भोजने यद्वदगदैरसशोषणम् । निबद्धकर्मणां तद्वत्, तपसा रसशोषणम् ॥६२७॥ निर्विकाराः प्रदेशास्ते, नाशमाप्नुयुरञ्जसा । निर्विकारं यथाऽपथ्यं, कायाच्छीघ्रं वियुज्यते ॥६२८॥ कर्मघाति तपश्चेन्न, बहुजन्मार्जितैनसः । न देहिनो भवेन्मोक्षो, यथा भोगेन जीवितम् ॥६२९॥ अज्ञाना ज्ञानसम्पन्नाः, समिथ्यात्वाः सुदर्शिनः । कुवृत्ताः शुभवृत्ताश्च , प्रत्यक्षं बहुसंक्षयात् ॥६३०॥ कर्मभ्यो बद्धयमानेभ्यो , बहूनां चेत् क्षयो भवेत् । न भोगमात्रजन्यस्तत् , क्षये हेतुः परो भवेत् ॥६३१॥ बद्धकर्मक्षयश्चेन्न, विना भोगं तदा वृथा । सर्वे धर्मा मुधा चैव , प्रायश्चित्तविधिः पुनः ॥६३२॥ लोके कृतापराधोऽपि , सान्त्वयेन्नामनादिभिः । यथा तथोपास्तमंहः, किं न शोध्यं तपोमुखैः ? ॥६३३॥ कर्मणा बध्यते जन्तू, रागद्वेषरसाकुलः । रागद्वेषौ विनिर्घात्य, हन्त्यंहः किं न सत्तपाः ? ॥६३४॥ कर्मकाष्ठाग्निरेवेदं, नापरं कर्मदाहकम् । अतो द्वादशधा प्रोक्तं, निर्जरायां तपो बुधैः ॥६३५॥ ये संवरमनाधाय, तपस्यन्ति विमुक्तये । तेऽन्धवानवत्सखाद-न्याये सफलताभृतः ॥६३६॥ मासोपवासतो यन्न, कर्म चिक्षिपुरादरात् । असंवृता नरो ज्ञानी, तद्गुच्छ्वासतपाः क्षिपेत् ॥६३७॥ आमयं मूलतो हन्ति, सानुपानं यथौषधम् । कर्माणि मूलतो हन्ति, तथा संवरयुक् तपः ॥६३८॥ अकामा निर्जरैषा यत्तपःसंवरवर्जितम् । तैलिको गौर्जे यथाति, गव्यूर्ति भासगाम्यपि ॥६३९॥ अत एव महादुःखाः, क्षुत्तृडाद्यैर्निपीडिताः । नारकाद्या न मुच्यन्तेऽशतस्ते नहि संवृताः ६४०॥ ततोमोहं समुत्सृज्य, विषयेषु च पञ्चसु । दुःखद्रूपं सुखमीतिं, कुर्याद्वीर्यात्तपो मुनिः ॥६४१॥ प्राधान्यं ममतामुक्तेरितीदं चरणं मतं । चारित्रमोहनाशोत्थं, प्रत्याख्यानं ततो मतम् ॥६४२॥ रथस्य चक्रयुग्मेन, वर्त्मनि स्यात् प्रवतनम् । मोक्षे तथैव जीवानां, तपः संयमयुग्मतः ॥६४३॥ अतोऽनगार सायां, तपःसंयमभाविताः । ग्रामानुग्राममायान्तो, वर्ण्यन्ते मुनयः श्रुते ॥६४४॥ ज्ञानाग्निः सर्वकर्माणि, भस्मसात् कुरुते ध्रुवमिति । शीलहीनवचो, ज्ञानक्रियाभ्यां कर्म दह्यते ॥६४५॥ तत्रापि साधनं ज्ञानं, बन्धनाशविबोधने । तत्पूर्विका क्रियैव स्यात् 'कर्मै-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धोराहमत्यला ॥ ६४६ ॥ प्रवृत्तिर्देहिनां चित्रा, परिणामविशेषतः । कर्म बध्नन्ति तच्चित्रं, प्रकृत्यादिविशेषतः ॥ ६४७ ॥ काचिद्योगात् कषायाच्च, प्रमादबलयोजितात् । सानुबन्धादाग्रहाच्च, काचित्काचिद् भवेत् पुनः ॥६३८॥ श्लेषितं स्यात्ततः कर्म, किञ्चिद् बद्धं निधात्तिलम् । परमां तु दशां प्राप्तं, भवेत् कर्म निकाचितम् ॥ ६४९ ॥ क्षयेपि कर्मणां तेषां, चित्रा एव हि हेतवः । भोगनिन्दालोचनाद्या, यथा रोगस्तथौषधम् ॥ ६५० ॥ निकाचितानां पापानां, न क्षयो भोगमन्तरा । सामान्येन विशेषात्तु, न चेत् स्यादान्तरा क्रिया ॥ ६५१ ॥ तथाभव्यत्वपाकश्चेन्, नियत्या-दिकृतो भवेत् । आग्रन्थिभेदमामुक्तेर्यथा कालं समं भवेत् ॥ ६५२ ॥ तदा निकाचितं कर्म, क्षेयं तद्भोगमन्तरा । स्यातां द्वे आन्तरे तत्र, करणे तत्क्षयक्षमे ॥ ६५३ ॥ सम्यक्त्वं लभ्यते ह्याद्ये, द्वितीये चरणं परं । द्वयोरप्यनयोरात्मा, वीर्यप्राचुर्यभासुरः ॥ ६५४ ॥ तत्र ध्यानं भवत्युग्रं, तप आभ्यन्तरं च तत् । निकाचिताघनिस्तारे, तप एवावलम्बनम् ॥ ६५५ ॥ चतुर्थाद्यवमौदर्य- मभिग्रहो रसोज्झितिः । कष्टं काये च लीनत्वं, षोढा बाह्यं तपस्त्विदम् ॥ ६५६ ॥ अभ्यन्तरं दोषशुद्धि-विनयः परसंस्क्रिया । पाठो ध्यानं समुत्सर्गः, षोढेति द्वादशं तपः ॥ ६५७ ॥ दृष्टिचारित्रमोहौ द्राक्, क्षपयित्वा श्रयेद् गुणौ । सम्यक्त्वं चरणं चेति, करणे कर्म दुर्बलम् ॥ ६५८ ॥ तपांसि योगकरणे, श्रित्वा न च शिवोद्यते । जीवे ते कर्मणां शेषः, कथं क्षेप्योऽन्यथाऽर्थिभिः ? ॥ ६५९ ॥ बन्धो रुद्धो यतो योग-करणे प्रतिबन्धिते । अयोगकरणश्चाङ्गी, ध्यानात् कर्म विनाशयेत् ॥ ६६० ॥ सर्वसंवरमाविष्टो, व्युच्छिन्नक्रियतो मुनिः । श्रेणिसिक्तं निधार्यैनः, प्राप्नोति पदमव्ययम् ॥ ६६१ ॥ न चेद् ध्यानं तदा कर्म-क्षयाय क्षममिष्यते । क्षयान्निःशेषपापाना-मयोगस्य कथं शिवम् ? ॥ ६६२ ॥ सयोगकरणानां स्याद्, ध्यानमैकाग्र्यमान्तरम् । योगरोधस्त्वयोगानां, ध्याने तल्लक्षणद्वयम् ॥ ६६३ ॥ निश्चयज्ञानवृत्तीनां, सामर्थ्यं कर्मरोधने । अघानां शोधनायाऽर्थं, ध्यानं तत्तप उच्यते ॥ ६६४ ॥ प्रकाशनं विदस्तत्त्वं, संयमस्य च गोपनम् । शोधनं तपस्तत्त्वं, सदृष्टेरन्वयं त्रिभिः ॥ ६६५ ॥ साधयेत् संवरेणाङ्गी, बन्धाभावं यथाक्रमं । निर्जरां तप आप्तानां, तद्ध्यानं परमं तपः ॥ ६६६ ॥ चित्तं सक्तं न गेहादौ, न च भीतं मृतेरपि । योग्यालम्बनसंसक्तं, स्थिरं ध्यानतया मतम् ॥ ६६७ ॥ अयोगिनो मुखे सर्व-संवरो न परं पदम् । सर्वकर्मच्छिद्रो ध्यान-स्यान्ते स्यात् पदमव्ययम् ॥ ६६८ ॥ एवं मोक्षं गता जीवा, अतीतेऽनन्तसङ्ख्यकाः । भविष्यति



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमिष्यन्ति, धर्मैरेभिः सदादृतैः ॥ ६६९ ॥ आद्या चतुष्टयी सेव्या, स्वयं धर्मार्थिभिर्नरैः। द्वितीयादेशके शिष्येऽप्यपेक्ष्या
धर्मसिद्धये ॥ ६७० ॥ अनादिकालतो जीवैर्भ्राम्यद्भिर्भवसागरे । बादरत्वादिसामग्री, नाल्पपुण्यैरिहाप्यते ॥ ६७१ ॥
चक्रयालये पुनर्भुक्तिर्धिग्जातीयस्य दुर्लभा । यथा तथा भवाम्भोधौ, मग्नानां साधनं पुनः ॥ ६७२ ॥ प्रातिधा-
रणपर्यन्ता,ः सामग्र्या दुःखदारुणा । वित्त्वेति मानवैर्भाव्यं, तत्साफल्यकृतौ यतैः ॥६७३॥ धर्मस्यार्हो भवेत्प्राणी,
यो न रक्तादिदूषणः । रक्तो द्विष्टोऽमतिर्भ्रान्तो, धर्मं श्रोतुमऽं नहि ॥ ६७४ ॥ अर्थी सामर्थ्ययुग्योग्यो, धर्मे-
ऽधिक्रियते नरः ॥ पुद्गलानन्दरोधेन, सर्वैरेतैः क्षमो भवेत् ॥ ६७५ ॥ धर्मनिश्रेणिमूलं तत्, सङ्गत्यागो बुधैर्मतः ।
फले धर्मस्य देहस्यानादिः सङ्गोपि वर्ज्यते ॥ ६७६ ॥ निर्जरा तत्त्वतो मुक्तेः, पार्थक्यमिदमेव । एषा देहाश्रित-
स्यैव, तन्मुक्तस्येयमुत्तमा ॥ ६७७ ॥ कर्मसत्ताभृतां कर्म-क्षयो निर्जरणं मतं । ह्रदस्य ह्रासवन्मुक्ति-रसत्ताका स-
घातना ॥ ६७८ ॥ आदिमध्यान्त्यकल्याण-लक्षणो धर्म इष्यते । यथा तथा भवत्येषोऽसङ्गो धर्मस्तथा तथा ॥६७९॥
तत्त्वतोऽङ्गी गुणस्थानेष्वारोहन् क्रमतस्त्यजेत् । अतत्त्वादिगतं सङ्गं, प्रान्त्ये निःसङ्गतामयेत् ॥ ६८० ॥ सम्य-
क्त्वलाभ उद्युक्तो, जीवो मिथ्यात्वघातनात् । सङ्गं छिनत्त्यसत्तत्त्वेऽनन्तानुबन्धिभेदनात् ॥ ६८१ ॥ सङ्गस्तत्त्वे
न सङ्गात्मा, यत्सोऽसङ्गत्वहेतवे । अपथ्यमप्यपथ्यं न, तद्यद् व्याधेः क्षयं करम् ॥ ६८२ ॥ हत्वा क्रोधं मदं मा-
यां, लोभं जन्तुः समाश्रितः । चित्स्वरूपाप्तये धर्मं, सत्यशौचतपोयमैः ॥ ६८३ ॥ परं निस्सङ्गताभावो, नागतस्था-
गभावनात् । चेन्मुक्तेः सम्भवो दूरं, निदानोपहतात्मवत् ॥ ६८४ ॥ सोऽर्हो दर्शनमप्याप्तुं सजते विषयेषु न ।
भवाभिनन्दिता त्यक्ता, येन यश्चात्मसन्मुखः ॥ ६८५ ॥ एष रत्नत्रयीमार्गोऽन्त्यावर्ते प्राणिनो भवेत् । नैर्ग्रन्थं शा-
सनं वीक्ष्य, जिनोऽतो मार्गदः स्मृतः ॥ ६८६ ॥ मार्गमेनमनुप्राप्य, निस्सङ्गं त्यागकामुकः । शुद्ध्या प्रचुरया सम्य-
ग्दर्शनं प्राप्तुमर्हति ॥ ६८७ ॥ नातः क्षुद्रादिदोषाणां, सम्भवो मार्गगे नरे । इच्छा तस्यान्यये स्थाने, सर्वसङ्ग-
विवर्जिते ॥ ६८८ ॥ धर्ममूलं मतं त्यागः, सङ्गः संसारमूलिकः । तदन्त्यावर्तगः प्राणी, शिवेप्सुर्न परत्र तु
॥ ६८९ ॥ अतोऽन्यं पदं, वाञ्छन्, य इन्द्रियसुखान्वितम् । पुनर्गर्भागमाकाङ्क्षो नावर्तागतोऽसुमान् ॥ ६९० ॥
धर्माद् देवाद् गुरोर्वाञ्छन्, देवमर्त्यभवाश्रितम् । धर्मे यो वर्तते जन्तुर्भव्यो नैव स निश्चयात् ॥ ६९१ ॥ श्रावका-



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

णां कुले जातः, कुलधर्मतयाऽसुमान् । शुद्धं देवं गुरुं धर्मं, संश्रयन्नपि तत्तया ॥६९२॥ येन्नाव्ययपदार्थे तान् सेवते मनुतेपि वा । नैसर्गिकं न सम्यक्त्वं, बुधैस्तत्राभिमन्यते ॥६०३॥ सङ्गरोहतनूरिक्तं, शिवं साध्यं धरन् हृदि । कुदेवगुरुधर्मेषु, रुचिमान्न शमव्यकः ॥६०४॥ त्यागस्य धर्ममूलत्वात्, प्राणी धर्माय दानकृत् । लाभं लाभं पुरा मत्वंस्त्यागी लाभतया गणेत ॥६०५॥ इन्द्रियार्थेषु सिद्धेषु प्रागभूद्धर्षपूरितः । नियम्य तांस्तु शीलेन, हृष्टो धर्मेऽधुनाऽभवत् ॥६०६॥ आबाल्याद्गृध्रिरस्यासीद्, भोजने रससम्भृते । त्यागेनास्य रतिर्जाताऽनशनादि तपस्यतः ॥६०७॥ प्रत्यहं पुद्गलासक्तेर्भावोऽभूल्लोभमूलकः । धर्मे प्राप्तेऽधुना भावो, भावनासूपसंहृतः ॥६०८॥ यथाभद्रोऽपि धर्मार्थं पात्रे दानं ददत्सुधीः । त्यागमेव पुरो धत्ते, धर्मकार्येषु नापरम् ॥६०९॥ कानिचिद्दानदक्षाणि, कुलानि धर्मभावनाम् । धृत्वा दाने प्रवर्त्तन्ते, त्यागो धर्मस्य कारणम् ॥७००॥ जातास्तीर्थङ्करा जीवा, मिथ्यादृक्त्वेपि साधुषु । दत्वा दानं यथाभावं, किं न त्यागेन जायते ? ॥७०१॥ विना भावेन वीरायाभिनवश्रेष्ठिना पुरा । यद्दत्तं तन्नरामर्त्यसंसदः स्तुतिकारणम् ॥७०२॥ श्रीधन्यशालिभद्राद्या, यथाभद्रा असदृशः । दत्वा सन्मुनये दानं, किं नाभूवन्नरोत्तमाः ॥७०३॥ व्रतमूलमहिंसा सा, यथार्था जैनशासने । षड्जीवकायजीवत्वं, तत्रान्यत्र न कुत्रचित् ॥७०४॥ जैनशासनसम्यक्त्वेऽभिगते द्रव्यतोपि च । तद् व्रतानि स्युः परं दाने, नियमो नहि तस्य तु ॥७०५॥ विना सम्यक्त्वमखिलं, निष्फलं भवति यन्मतम् । मोक्षमार्गतया तत्तु, मार्गः स्यात्कथमन्यथा ॥७०६॥ दाने त्यागस्तु सम्यक्त्वे, मिथ्यात्वे वापि शस्यते । मार्गानुसारिणी चेष्टा, प्रशंसां किमु नार्हति ? ॥७०७॥ मिथ्यादृक् शुद्धदृग्वापि, दद्यात् शुद्धाय साधवे । कल्प्यं यदन्नपानादि, सर्वत्र त्यागशस्यता ॥७०८॥ व्रतानि पालयन् श्राद्धो, द्वादशापि सुधुर्धिना । सप्तक्षेत्र्यां च रङ्के च, ददत् श्राद्धो महान् मतः ॥७०९॥ सर्वे जिनेश्वरा दीक्षाकालात् प्राग्वत्सरं समम् । याद्दच्छिकं ददुर्दानं, त्यागधर्मं समाश्रिताः ॥७१०॥ जीवाऽस्ति वादिषट्स्थानं श्रद्धावान् श्रावको जनः । निश्चयात् कुरुते दुःस्थेऽनुकम्पां प्राणिनि स्फुटम् ॥७११॥ दीनानाथेषु यो दानं, दद्यात्तस्य गृहे बहुः । त्यागोऽन्नादेस्ततः साधोः, शुद्धाहारसम्भवः ॥७१२॥ प्रचुरत्वान्न कर्मादि भक्तादौ सम्भवः खलु । मितम्पचे दयाहीने, गृहे भक्तं न शुध्यति ॥७१३॥ अनुकम्पापरीताः किं, जि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न दानागते जने । दानशाला अकार्षुर्न, जिनानां पितरः किमु? ॥ ७१४ ॥ दुर्भिक्षामारिसैन्यादि-भयं लोके प्रणश्यति । त्यागधर्मप्रभावोऽयं, जिनेशातिशये न किम् ? ॥७१५॥ दुःखिनां दुःखमुद्धर्तुं, स्थाप्यते तीर्थमर्हता । दुःखसन्तानमुद्धर्तुं, प्राणिनामनुकम्पनम् ॥ ७१६ ॥ सार्था ज्ञानादयो दुःखो-च्छेदादन्त्यं प्रयोजनम् । सर्वदुःखान्तकृत्त्वं यत्, प्रोक्तं जैनेन्द्रशासने ॥ ७१७ ॥ प्राणानुकम्पनायैव, साधोः समितिपञ्चकम् । व्रतान्निन्नानुकम्पाऽतो, या हेतुर्नरजीविते ॥ ७१८ ॥ प्रत्यब्दं योजनोन्माने वने वृक्षान् समुच्छिदन् । शशानुकम्पया हस्ती, परीतभवमानवः ॥ ७१९ ॥ पुरे राजगृहे राज्ञः, क्षायिकीं दधतो दृशम् । श्रेणिकस्याङ्गजो वीर-शिष्यो मेघो न किं ततः ? ॥ ७२० ॥ युग्मम् दुःखिनां द्रव्यदुःखेन, चेच्चित्ते नानुकम्पनम् । संसारात्तस्य निर्वेदो, न वैराग्यं न चांशतः ॥ ७२१ ॥ संवेगाद्या मुमुक्षा सा, भवदुःखविचिन्तनात् । मुच्यन्ते परिनिर्वान्ती-त्यादि तीर्थविशेषणात् ॥ ७२२ ॥ यथाधिककरणं न स्या-त्तथा साधोः प्रवर्तनम् । एकान्ते कीटिकादीनां, निःसङ्गातं तु मोचनम् ॥ ७२३ ॥ पादावुद्धृत्य गन्तव्यं, प्राणिनं प्रेक्ष्य वर्त्मनि । प्राणिनां दुःखसङ्घात-परिहाराय कथ्यते ॥ ७२४ ॥ प्राणा भवन्तु मा वा स्या-त्तेषां रक्षाविधौ क्रिया । घ्नन्तु मा घ्नन्तु वा जीवाः, कर्मबन्धो न लेशतः ॥ ७२५ ॥ न जीवरक्षणोद्योगो, भवेद्धिंसा न वा भवेत् । हिंस्रो भुवोंहसां बन्धो, यस्य स्याद्दारुणं फलम् ॥ ७२६ ॥ जीवितुमिच्छवः सर्वे, जीवा मर्तुं न केऽपि च । तस्मादेव वधस्त्यक्तो, निर्ग्रन्थैर्मोक्षगामिभिः ॥७२७॥ व्याप्तेऽनुकम्पया चित्ते, प्रव्रज्यां लातुमिच्छता । त्यागात्प्राणवधस्यार्थ–त्यागोपि क्रियते बुधैः ॥ ७२८ ॥ अनुकम्पा न चेच्चित्ते, किं प्राणिनां वधं त्यजेत् ? । अनुकम्पा च चित्ते चेन्न किं प्राणिवधं त्यजेत् ॥ ७२९ ॥ प्राणसङ्ख्यां समाश्रित्य, तारतम्यमघे मतम् । शुद्धिश्च क्रियते प्राण-सङ्ख्यावत्तपःक्रमैः ॥ ७३० ॥ बध्नाति नरकेष्वायुः, पञ्चाक्षप्राणिहिंसकः । विहाय मांसमत्स्यन्व-मद्युव्रतधरोऽङ्गिमान् ॥ ७३१ ॥ व्रतेषु स्यादुपस्थाप्यः, षट्कायेष्वनुकम्पकः । अधीतकायसूत्रः सन्, वधत्यागे परीक्षितः ॥ ७३२ ॥ अनुकम्पान्वितं तीर्थ-मनुकम्प्य जगत् कृतम् । अनुकम्पां विधायैतद्, व्रजत्युन्नतिमुत्तमाम् ॥ ७३३ ॥ आरके ह्युत्सर्पिण्या, आद्ये सम्मील्य मानवाः । मांसस्यानुकम्पयैव, स्थापयिष्यन्ति निवृत्तिम् ॥७३४॥ मीलस्त्यागान्नरो ह्ययं, सिद्धमप्यनुकम्पनम् । रुणद्धि रोधयेच्चैव, प्राप्य दुर्गतिगान्मुकान् ॥ ७३५ ॥ [illegible]तन्वरु-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पोऽयं, जीवः सङ्गपराङ्मुखः । आदावाहारमाकाङ्क्षेत्तैजसस्यैव सङ्गमात् ॥ ७३६ ॥ आहाराज्जायते कायस्तस्मिन्ना-
भवमश्नुते । सङ्गभावं विधत्ते च, तस्मात्पापपरम्पराम् ॥ ७३७ ॥ परं पश्चानुपूर्व्या स्यात्, त्याग इत्थं विचिन्त्यताम् ।
कायस्य सर्वथा त्यागो, स्यादेव परमं पदम् ॥ ७३८ ॥ रागत्यागी भवेद्देवः, सङ्गत्यागी गुरुर्मतः । सक्तित्यागी
सुदृष्टिः स्याद्गृहत्यागव्ययये पदे ॥ ७३९ ॥ येन येन भवे त्यागो, जीवस्यांशेन बाह्यगैः । तेन तेन भवेद्धर्मो,
जीवस्यांशेन शुद्धिकृद् ॥ ७४० ॥ अच्छेद्यस्त्यागधर्मोऽयं, साधयेत् परमं पदं । क्रमवृद्धो यतः प्रोक्त-मष्टभिश्चरणैः
शिवम् ॥ ७४१ ॥ देशपापस्य च त्यागो, जन्मभिरष्टभिरङ्गिनाम् । अविराद्धः शिवं दत्ते, सर्वत्यागाभिगामुकः-
॥ ७४२ ॥ सक्तेस्त्यागोपि लब्धश्चेत्, प्राणिनां ग्रन्थिभेदतः । अवश्यमव्ययं दत्तेऽङ्गिनोऽर्धावर्तकालतः ॥ ७४३ ॥
मदत्यागे यथा विद्वान् , विद्वान् परः परः पुनःगत्वा निगोदमायातस्त्यागी त्यागेयेव निश्चयात् ॥७४४॥ त्यागः क्षान्त्यात्म-
नि क्राम्येत्, संस्कृतिं मार्दवाद् व्रजेत । शुद्धतामार्जवे नेयान्मुक्त्या सन्ततिमश्नुति ॥ ७४५ ॥ सत्यशौचयमास्त्या
गं, जने धर्मतया स्फुटं । चारयेयुस्तपस्त्याग, वधयेत्तु पदे पदे ॥ ७४६ ॥ एवं नवविध धर्मं, निधाननवकोपमं ।
चक्रित्वानुभवं प्राप्य, कुरु कर्म विनाश्य भोः ! ॥ ७४७ ॥ कुत्र तिष्ठति धर्मोऽयं, कथं भवति रक्षितः ? । कश्चै-
नं वर्धयेन्नित्यं कथं दद्यात् परं फलम् ? ॥७४८॥ कश्चैनं कथयेल्लोकान्, कथं च सुकथो भवेत् ? । कथं ग्रा-
ह्यः कथं देयः, कथं च स्थिरतां भजेत् ? ॥ ७४९ ॥ ब्रह्मचर्याद्भवेत् सर्व-मेतत्तद्गणवासिता । संयमे सङ्गहानौ
च, गता मैथुननिर्वृतिः ॥ ७५० ॥ मैथुनान्निवृत्तिर्ब्रह्म, चेत् तत्तद्रक्षणादिषु । प्रबलो गणवासस्तद्, ब्रह्मचर्यतया-
मतः ॥८५१॥ गृहाङ्गनार्थं मुक्त्वा यः, श्रामण्यं समुपस्थितः । नियमात् स गणे तिष्ठेदन्यथा मुक्तिविप्लवः ॥७५२॥
प्रमादवासितोऽनादेः, संसक्त्या तत् प्रमादिनाम् । अप्रमत्तः प्रमादी स्यात्, संसर्गादाम्रनिम्बवत् ॥७५३॥ गुणदोष-
समुत्थानं, यद्यप्यात्मकृतेर्भवं । तथापि सङ्गदोषेण, दुग्धं तक्राद्यथा दधि ॥ ७५४ ॥ गुणा दोषाश्च जीवस्य, क्षया-
दुदयाच्च कर्मणां । तथापि सहवासेन, भावस्य परिणामिता ॥ ७५५ ॥ ततो योऽनघधर्मार्थी नियमेन गणं
श्रयेत् । यतस्तत्र सुधर्माण, एव तिष्ठन्ति साधवः ॥ ७५६ ॥ साधुं गणे स्थितं दृष्ट्वा, स्पष्टं लोको ब्रवीत्यदः
मूर्त्तधर्मस्वरूपोऽयं, वन्द्यो दिविषदामपि ॥ ७५७ ॥ शैक्षका गणमाश्रित्य, भवेयुर्मुनयोऽनघाः । प्रव्रज्यां मुण्डन



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चापि, गणादेवाप्यते बुधैः ॥ ७५८ ॥ अभुत्वाकेवली जातो, गणभिन्नो न कश्चन । प्रव्राजयेन्मुण्डयेच्च, जिनादिकल्पिका अपि ॥ ७५९ ॥ पिण्डादौ कल्पिको यावन्न जातस्तावदात्मना । नालं पिण्डादिदोषाणां, परिहाराय पाप्मनाम् ॥ ७६० ॥ प्राणिनं दीक्षयित्वाऽतः, स्थविरेभ्यो गणेशिभिः । अर्प्यते द्विविधां शिक्षां, स्थविरा ग्राहयन्ति तम् ॥ ७६१ ॥ सूत्रेऽधीते दोषजाले, ज्ञाते पिण्डाश्रयादिषु । निर्दोषमुपभोगी स्यादनूनो महिमा गणे ॥ ७६२ ॥ पिण्डाद्यशोधयन् साधु-निश्चरिश्री न संशयः । औद्देशिकादिभोगेन, स्यान्महाव्रतखण्डनम् ॥ ७६३ ॥ जानात्यकृतयोगी न, विधिं धर्मनिदेशने । देशश्रोतृप्रकृत्यादे-रबोधात् परथा मृषा ॥ ७६४ ॥ अज्ञात्वा बालदेशादिद, देशना मार्गबाधिनी । मार्गबाधकवाक्यश्चानन्तं संसारमर्जति ॥ ७६५ ॥ विभक्तौ वचनानां ये, स्युर्नरा नहि कोविदाः । न समिता न गुप्तास्ते, भाषाविधिविवर्जिताः ॥ ७६६ ॥ मोक्षो ज्ञानक्रियाभ्यां स्यादुमे ते गणसंस्थिते । आचार्यानुक्रमाल्लभ्ये, अन्यथा केकिनृत्यवत् ॥ ७६७ ॥ गणे सूत्रार्थपाठी स्याद् , विचित्राभिग्रहो मुनिः । बालवृद्धतपस्व्यादिमुनिभिः संयुतो गणः ॥ ७६८ ॥ धर्मात्मनां गणे स्थानं, तं द्रष्टात्र गवेषते । तदर्थी संश्रयेत्तं च, तस्माद्गणे मुनिःस्थितः ॥ ७६९ ॥ रक्षन्तो गणमाचार्याः, स्मृतिनोदनवारणैः । रक्षन्ति धर्ममेवेमे, निश्रोपश्रोज्झिताः सदा ॥ ७७० ॥ अध्यापयन्त्युपाध्यायाः, शिष्यानङ्गादिसंहतिम् । येन ते मोक्षमार्गस्था, भवेयुः स्वान्यरक्षकाः ॥ ७७१ ॥ सहायाः साधवः सर्वे, संयमे यत् समं स्थिताः । वारयेयुरतीचारात्, साक्ष्यात्तेषां बिभेत्यतः ॥ ७७२ ॥ चित्रमेकाकिनः कामो, ज्वलति ब्रह्मदाहकः । ज्वलितोऽपि स निर्वाति, दृष्ट्वाप्यन्यान् व्रतोद्धुरान् ॥ ७७३ ॥ स्थविरा नूतनान् साधून्, विह्वतान् कृतयोगिनः । सहाध्यायाः समाध्यायान्, समर्था आतुरान् मुनीन् ॥ ७७४ ॥ वैयावृत्त्यकरा वृद्धान्, सूर्यादीन् शास्त्रधारकाः । कृतानशनिनो धुर्या, रक्षन्तो धर्मरक्षकाः ॥ ७७५ ॥ गेहेष्वर्थार्जने दक्षो, व्यापारे धनरक्षणे । कुटुम्बसेवने चासीन्नतु धर्मस्य वर्धने ॥ ७७६ ॥ न दारादिजनान् बन्धून् , ज्ञातेयान् पाटकाश्रितान् । ग्रामदेशाश्रितांल्लोकान् , धर्ममाश्रित्य वार्त्तयेत् ॥ ७७७ ॥ वार्ता धर्मस्य गच्छस्थ-मुनेरग्रे प्रवर्तयेत् । पृच्छेद् वृद्धेष्व रक्षाया, हेतून् प्राप्य मुनीश्वरान् ॥ ७७८ ॥ धर्मस्याराधनां लोके, कारयन्ति मुनीश्वरान् । प्रस्थितान् प्रेत्य धर्माय, प्रेरयन्त्येव साधवः ॥ ७७९ ॥ लोका यथा परांल्लोकान् , स्वं व्यवहारं निवेदितुं । दधते ज्ञापकं तद्वद्धर्मचिह्नाङ्कितो मुनिः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥७८०॥ प्राप्तुं वर्धयितुं श्राद्धं, निष्कलङ्कं प्रचारितुं । धर्मगां प्रेक्षते लोको, मुनेरास्यं परं नहि ॥७८१॥ गतो
भवान्तरं मा भूद् धर्मच्युतो मुनिर्जनः । मृतेऽप्यस्मिन् धरत्यग्रे, चिह्नं साधुत्वदर्शकम् ॥७८२॥ गणे धर्मस्य
रक्षा तत्, क्षान्त्यादि विनयादि च । नैकाकिनो मुनेर्यस्मात्तस्मिन् स्वाच्छन्द्यचक्रिता ॥७८३॥ प्रमादवासितो जी-
वोऽह्न्येकस्मिन् शुभाशुभान् । एति भावान् स्वतन्त्रं तं, कोऽलं स्यात्सन्निवारणे ॥७८४॥ प्रत्याख्याने ध्रुवे साधुः,
पुनः कर्तव्यमस्त्यदः । सामायिके च श्राद्धानां, धर्मरक्षापरो वदेत् ॥७८५॥ परोपदेशपाण्डित्यं, नात्रेत्यूचुर्मुनी-
श्वराः । सामायिकं करोमीति, दानेऽपि न परं वचः ॥७८६॥ ज्ञानदर्शनचारित्र-हेतुरूपफलेष्वलं । कार्येषु व-
र्त्तितव्ये तत्, प्रतिज्ञानं भवाश्रितम् ॥७८७॥ प्रमादोऽतो मतो दोषो, यो ज्ञानादिष्वनादरः । स्वपरज्ञानदृग्वृत्तरक्षा
कार्यं मुनेः परम् ॥७८८॥ त्राता अपि जडाः प्राणाः, खश्वासायुर्बलोद्भवाः । न त्रायन्ते परे जन्मन्यसत्त्वं विश्वस-
म्मतम् ॥७८९॥ धर्मप्राणास्तु ये दत्ता, रक्षिताश्च मुनीश्वरैः । अनश्वरास्ततः प्राहुर्धर्मानाशान्तिकां क्षमाम् ॥७९०॥
यथाऽत्मा नैव दाह्योऽयमवाह्यश्चाम्बुराशिना । अभेद्यश्च तथा धर्मो, यत्तस्यासौ गुणो मतः ॥७९१॥ धर्मस्य
प्रापणे जीव-परिणामः क्षयोद्भवः । प्रमादैश्चलः सैव, रक्षणे ह्युपयुज्यते ॥७९२॥ प्रमादवासितात्मन आप्नुवन्त्यं-
हसां क्षयम् । प्रमादाच्चलतां साधोरुपदेशाद् गणाश्रितात् ॥७९३॥ सूरेस्तदेव सूरित्व-मुद्धरेत् सकलं गणम् ।
संसाराब्धेर्यथारूपात्, प्रमादस्तेननाशतः ॥७९४॥ प्रायश्चित्तं यतः सूत्रे, शिष्याणां नोदनाविधौ । प्रमत्तस्य
मतं सूरेस्ततोऽसौ नोदनोद्यतः ॥७९५॥ सारयन् गच्छमाचार्यः, शिवं तृतीयजन्मनि । लभते तेने सूरीशः, प्र-
मादाद् वारयेन्मुनिः ॥७९६॥ उपाध्यायादयोऽप्यत्राधिकारिपदमागताः । यत्तेषामपि सूत्रेषु, दण्डः साधोरसारणे-
॥७९७॥ साधूनां सारणायैव, प्रतिक्रम्यान्तिके गुरोः । समीपे स्थानमादिष्टं, साधूनां सायमन्वहम् ॥७९८॥
आचार्यामन्त्रणं सर्वेष्वनुष्ठानेषु यन्मतम् । मतो वृद्धिर्भवेद्भावे, जातेऽजातोपि सम्भवेत् ॥७९९॥ श्रावकस्यापि
सद्भाव-रक्षणाय जिनेशिना । गौतमः प्रैषि शतकं, श्रावकं शिक्षितुं पुरे ॥८००॥ अतिमुक्तस्य बालाद्यां, चेष्टां
दृष्ट्वा तपस्विनः । वारिता निन्दनोद्युक्ताः, किं न सद्धर्मधारणात् ? ॥८०१॥ स्थिरीचकार मेघर्षिं, चारित्रं
चान्तुमानसं । यद्यानुकम्पोदन्तेन, महावीरो जिनेश्वरः ॥८०२॥ व्यवहारस्थिरत्वायानुजज्ञे प्राशुकान्यपि ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न वीरोऽव्ययमाकुले स्थेम्नाऽनानसादराः ( निसाधवः ) ॥८०३॥ गौतमस्वामिनः स्थेम्ने, द्रुमपत्रैक-
माहरत् । अनेकभवसंसृष्टः, वीरः सत्त्वहितोद्यतः ॥८०४॥ पञ्चपञ्चाशतं प्राहा-ध्ययनानां शुभाशुभे । वीरोऽ-
न्त्ये पट्ट च त्रिंशच्चा-पृष्टानां साधुसंस्थितेः ॥८०५॥ व्रतषट्कादयः सर्वैः, रक्ष्याष्टादश प्रत्यहं । सामाचार्यादृतै
रक्षा-कृते धर्मस्य साधुभिः ॥८०६॥ सच्छीलत्वाद्गुणस्थानां, स्थानं धर्मस्य सद्गणे । आवश्यकाद्यै रक्षाऽस्यै-
कादशैर्गणसङ्गतेः ॥८०७॥ विनयाद्यन्वाः सम्य-ग्गणे धर्मं प्रवर्धयेत् । वृद्धिर्धर्मस्य नान्यस्मा-द्विहायाचारपञ्चकम्
॥८०८॥ गणादिनिश्रया स्थास्नु-र्मुनिः पर्यायवृद्धितः । सुखासिकां परां धत्ते, यस्या वर्ये सुरोऽन्तिमः ॥८०९॥
मुनिरल्पवयस्कः सन्, गणे धर्मं प्रवर्धयन् । आप्नुयात् केवलं प्राप्या-नन्तानन्दमयं पदम् ॥८१०॥ अग्निर्यथा
स्वभावेन, गच्छत्यूर्ध्वमवारितः । तथा धर्मो गणे शान्ति-र्यस्माच्छान्त्यनुबन्धिनी ॥८११॥ एकान्तात्यन्तिको धर्मो,
गुरोराज्ञां धरत्यलम् । अतः सूक्ष्मोऽपि नियमात्, फली पर्यन्त वृद्धिमान् ॥८१२॥ हेतवः प्रतिपातस्य न गणे
वृद्धिहेतवः । सत्साहचर्यबोधाद्या, धर्मस्यालम्भविष्णवः ॥८१३॥ क्रियास्वाध्यायसद्ध्यान- विधानाच्छिन्नवर्ष्मणां
मुनीनां कथया कालो, ऽत्यत्येति प्रोक्तुरात्मनाम् ॥८१४॥ आबाल्यान्मानवा लीना-श्चरितान्वितरास्वपि । कथास्वतः
परं तत्त्वमिति हि प्रोच्यते बुधैः ॥८१५॥ आद्योऽनुयोग एवेष्टो, यः स्याद्धर्मकथामयः । जिनानां गणिनां श्रेणेरुक्तिस्तत्क-
ल्पमंगके ॥८१६॥ यद्यप्यर्थस्य निर्णीतिः, केवलाज्ज्ञाततो न हि । बहिर्व्याप्तिस्वरूपं तदन्तर्व्याप्त्याऽर्थनिश्चयः ॥८१७॥
अन्यथानुपपन्नत्व-निश्चितिर्व्याप्तिरान्तरा । सदसत्त्वेन नार्थोऽत्र, परा या विदुषां नयात् ॥८१८॥ अत्यन्तसूक्ष्म-
बुद्धीनां, विवादापन्ननिर्णये । सत्यप्येवं न बालानां ते हि दृष्टान्तदर्शिनः ॥८१९॥ सरसं ते द्विधा ज्ञातान्,
चरितान् कल्पितानपि । शृण्वन्ति तद्वतं वृत्त-माचरन्ति च हेलया ॥८२०॥ यदा च कल्पितं ज्ञातं, रसं श्रो-
तृषु वर्धयेत् । किं कथ्यं चरिते ज्ञाते, विशेषात् स्वगणोद्भवे ॥८२१॥ अतएवहिचरमेऽङ्गेचित्राः, सुपठितास्तु
गण्डिकाः । चरितानि प्रयुक्तानि, जिनादीनामिहर्षिभिः ॥८२२॥ उपोद्घाते विशेषेण, निर्गमद्वारमुच्यते । जिनानां
गणिनां यस्मा-न्नियुक्तौ श्रोतृबुद्धये ॥८२३॥ देववाचकवर्यास्तन्नन्द्यारम्भे जिनेशिनाम् । गणिनां चावलीमाहुः,
प्राक् पुरुषातिभक्तये ॥८२४॥ सम्यक्त्वस्य मता शुद्धि-र्या चतुर्विंशतिस्तवात् । जिनानां कीर्तनं तत्र, नाम्नां



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चेच्चरितान्न किं ? ॥ ८२५ ॥ श्रेयोनिर्वाणदं जैने, शासने मतमर्हतां । कीर्तनं दर्शनं शुद्धं, पश्चात्सामायिकादरात् - ॥ ८२६ ॥ वृत्त चेन्मानसे स्थैर्य, ज्ञानादीनां प्रवर्त्तयेत् । महात्मनां तदा तत्स्थ-गुणेभ्यः स्पृहयेन्मनः ॥ ८२७ ॥ गुणान् वर्धयितुं सोऽलं, गुणेभ्यः स्पृहयालुतां । दृढां यो मानसे धत्त, तद् बृद्धेजे धर्मवर्धनम् ॥ ८२८ ॥ महात्मनां चरित्रस्य, श्रवणे यो गुणोच्छ्रयः । तस्मादप्यधिकः स स्यात्तत्सङ्गवचनादरैः ॥ ८२९ ॥ वृद्धेऽप्यस्मिन् परा वृद्धिं, गणादेवाधिगच्छति । अतोऽनशनकर्त्तारः, ससहाया गिरिं गताः ॥ ८३० ॥ एकोनपञ्चशत्या यन्मुनीनां स्कन्धकर्षिणा । कारिताऽराधना प्रापु-र्येया कैवल्यमुज्वलम् ॥ ८३१ ॥ माहात्म्यं पुण्डरीकाद्रे-विहृते श्रीजिने स्थिताः । कोट्या निर्वाणमालम्ब्य, पञ्चताः पुण्डरीकताः ॥ ८३२ ॥ गौतमस्यातुला भावा, दीक्षितास्तेन साधवः । अत्यल्पयत्नाः सम्प्रापुः, केवलं विजितान्तराः ॥८३३॥ वृद्धिर्ज्ञानस्य वज्रर्षेरपूर्वा गणसंश्रयात् । गुरवोऽप्य वबुद्ध्यैनां, चमच्चकुर्दा न किम् ? ॥ ८३४ ॥ तोसलिपुत्रसूरीणां, पार्श्वे श्रीआर्यरक्षिताः । पिपठिषवो दृष्टिवादं जग्मुः किं नाम्बयेरिताः ? ॥ ८३५ ॥ श्रुतज्ञानसमृद्धिस्तु, विना नाचार्यसन्ततिम् । क्षमाश्रमणहस्तेने-त्युच्यते श्रुतदातृभिः ॥ ८३६ ॥ परम्पराप्रवृत्त्यर्थं, तृतीयं मङ्गलं मतं । शास्त्रे सर्वत्र तद्वृद्धिः, श्रुतस्य गणसाश्रिताः ॥ ८३७ ॥ एकाकिनो भवेच्छङ्का, तत्त्वे वल्लीव विस्तृताः । तद्व्युच्छेदकृतः सूरे-रभावाद्दर्शनं चलेत् ॥ ८३८ ॥ प्रभावकानि सद्दृष्टेः, शास्त्राण्येकः समश्नुते । नैवातो दर्शनं वृद्धं, गणस्थैरेव लभ्यते ॥८३९॥ तदेवं परमा वृद्धि-र्धर्मस्य गणसंश्रिता । अग्र्यंच फलमस्य स्यादेवं गणस्य निश्रया ॥ ८४० ॥ अधर्मपरिहारी स्याद्धर्मस्य कथको मुनिः । अन्यथा धर्मकथनं, भवेन्नर्तकवृत्तिवत् ॥ ८४१ ॥ आवश्यकादिषु स्पष्टं, प्रत्याख्यानान्वितं समं । पदाङ्कितं करोमीति, सूत्रं तच्च मृषा भवेत् ॥ ८४२ ॥ न चोल्लङ्घ्याऽऽदिसूत्राणि, वाचमं परतो भवेत् । यथा वादी तथा कारी, योग्यः स्याद्देशको नरः ॥ ८४३॥ यथा वादं विधत्ते न, सोऽन्येषां हेतुतां व्रजेत् । मिथ्यात्वादेस्ततश्चास्य, दुरन्तो भवसागरः ॥८४४॥ सच्चिदानन्दरूपोऽय-मात्मा कर्ममलावृतः । तत्क्षये तत्स्वरूपः स्याद्धर्मोऽतो ऽघक्षयात्मकः ॥८४५॥ स एवालं क्षयं कर्तु-मघानां यो भवेद्यतः । तदागमनिरोधाय, भृतरिक्तोऽन्यथासुमान् ॥८४६॥ यश्च कर्मावरोधः स्यात्, स एव बलमर्पयेत् । प्राच्यकर्मक्षये तस्माद्बीजं धर्मस्य संवरः ॥ ८४७ ॥ हिंसादीना-



यतिधर्मो-
पदेशः

॥३८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मद्यानां, यां निवृत्तिं प्राणी अश्नुते । सा प्रमादकषायाक्ष-पापाज्जन्तुं निवर्त्तयेत् ॥ ८४८ ॥ तस्मात्तद्देशनां साधुः, श्रोतृणां पुरतो वदेत् । अत एव स देष्टार्हो, यः स्याद्धिसाद्यघाञ्झितः ॥८४९॥ सूक्ष्मत्रसेतराङ्गानां, त्रिधा त्रिधा वधं त्यजेत् । हास्यलोभभयक्रोधोद्भूतमप्यनृतं तथा ॥ ८५० ॥ ग्राह्यं धार्यमदत्तं चामरमर्त्यपशूद्भवम् । मैथुनं साधनाद्रिक्त-वस्तुनो ग्रहणं तथा ॥ ८५१ ॥ सर्वसत्त्वहितोद्युक्तो, गुणिनां पादसेवकः । दुःखिषु द्रवतां तन्वन्माध्यस्थ्यं तु नयाद्दते ॥ ८५२ ॥ धर्मस्य देशकः साधु-रेव यत्स महाव्रती । न देशनायां योग्यः स्याद्योऽधमानेषु वर्तकः ॥८५३॥ द्वावुत्सर्गापवादौ हि, मार्गौ सद्धर्मसाधने । यावज्जीवं न जीवाना-मवस्था सदृशीभवेत् ॥८५४॥ वाणिज्याऽऽयव्ययौ ज्ञात्वाऽन्यथा मूलं तु नाशयेत् । ज्ञात्वा शुद्धिमतीपातं, पदं परं समाचरेत् ॥ ८५५ ॥ देहस्य धारणं धर्म-हेतोस्तद्धर्महेतवे । मूलाबाधेन धर्मिष्ठाः, संश्रयन्ति परं पदम् ॥ ८५६ ॥ अज्ञात्वा मार्गमज्ञः सन्, श्रियेतादिदिने मुनिः । नाप्नोति धार्मिकीं वृद्धिर्ज्ञानादेरव्ययं कथम् ? ॥ ८५७ ॥ विजानानो मतं जैनं, स्याद्वादाचरणोद्यतः । रक्षश्चौरं धनग्राहं, यथा तद्व्रतं चरेत् ॥ ८५८ ॥ श्रोतॄन् बालादिकान् क्षेत्रं, कालं भावं च यो विदन् करोति मोक्षमार्गस्य, देशनां सोऽङ्कितारकः ॥ ८५९ ॥ पूर्वापराविरोधेन, हितकृत्साधुमार्गवाक् । देष्टा तेन प्रकल्पज्ञो, यतिधर्मं परं कथेत् ॥ ८६० ॥ अस्माज्जन्मान्तकाकीर्णा-दुद्विग्नो भवचारकात् । सदानन्दपदाकाङ्क्षी, गृह्णीयात् पापभीरुकः ॥८६१ ॥ श्रुत्वा धर्मं गुरोर्मूले, विनयादृतमानसः । गृह्णीयाद्विधिवद् धर्मं, विधिः सर्वत्र साधकः ॥ ८६२ ॥ पापस्थानानि सर्वाणि, श्रद्धायात्मोद्धुरान् गुरून् । देवान् धर्मांश्च मन्वानो, योग्यो धर्मस्य पालने ॥ ८६३ ॥ अर्थिनं वीर्यसंयुक्त-मभीतं पापपर्षदः । नरमप्रतिकृष्ट च सद्धर्म ग्राहयेन्मुनिः ॥ ८६४ ॥ अर्हदर्चागुरूपास्तिस्तत्त्वज्ञानं स्वनिग्रहः । समधर्मैश्च संसर्गो धर्मवर्धनहेतवः ॥ ८६५ ॥ जिनानां, जन्मदीक्षाद्य-ज्ञाननिर्वाणभूमयः । दृष्टा धर्मोत्थमाहात्म्याः, कुर्युर्धर्ममविच्युतम् ॥ ८६६ ॥ दशधर्मानिमान् ख्यान्ति, वीतरागा जिनेश्वराः । तेन स्वाख्याततता तेषां, शुद्धस्य शुचयो गिरः ॥ ८६७ ॥ मोक्षं धर्मो यदादद्याद्व्यर्थाऽनादीश्वरोक्तयः । धर्मो यदा न मोक्षाय, व्यर्थाऽनादीश्वरोक्तयः ॥८६८॥ धर्मः शक्यो यदा कर्तुं, किमनादीशकल्पना ? । धर्मोऽशक्यो यदा कर्तुं, किमनादीशकल्पना ? ॥ ८६९ ॥ धर्मादृते न मोक्षोऽस्ति, कुतोऽनादीश्वरादृतिः ? । धर्मादृतेऽस्ति मोक्षश्चे-





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

यतिधर्मो-
पदेशः

त्, कुतोऽनादीश्वराद्गतिः ? ॥ ८७० ॥ कर्तुः कर्मफलं दत्ते, कर्तृकल्पनया किमु ? । कर्मकर्तुः फलेन्नो चेत्, कर्तृकल्पनया किमु ? ॥ ८७१ ॥ अशरीरोऽपि कर्ता चेत्क्रिया कार्ये न कारणम् । कर्ता शरीरयुक्तस्त्कथं कर्ता अजो महेश्वरः ? ॥ ८७२ ॥ अकर्माऽपि शरीरी चेत्, सच्चिदानन्दता कथम् । सकर्मैव शरीरी चेत्, ईश्वरे किं चिदात्मता ? ॥ ८७३ ॥ स्यात्साध्यमीश्वरत्वं स्यादेक एव किमीश्वरः ? असाध्यत्वे महेशस्य, स्यादेकोऽपि किमीश्वरः ? ॥ ८७४ ॥ जनन्या बीजजातो यथांकुरो, बीजं तस्माच्च सम्भवेत् । अर्हद्भ्यो वचनं तस्मादर्हतां सम्भवस्तथा ॥ ८७५ ॥ सुराचलेऽभिषिक्तोऽग्रैः, गर्भकाले यो, गजादिस्वप्नदर्शकः । संक्लिष्टरागद्विड् नैव, सर्वत्रौचित्यकारकः ॥ ८७६ ॥ परीषहोपसर्गेभ्यो-ऽभीतः शक्रसामानिकादिभिः । दानं सांवत्सरिकं दत्वा, निष्क्रान्तः समहोत्सवम् ॥ ८७७ ॥ जिनकर्मोदयादिष्टा, तीर्थस्यार्कः स्वभाववत् । संयममुद्वहन् । हत्वा घातीनि चत्वारि, प्राप्तः केवलमुत्तमम् ॥ ८७८ ॥ स्वयमाचर्य भव्येभ्यो, धर्मं दिशति तीर्थपः । ततः अघातीन्यपि हत्वाऽऽप, शाश्वतं पदमव्ययम् ॥ ८७९ ॥ एवं जिनेश्वरमते भविभावनीया, स्वाख्याततताऽतनुसुखादतिसास्वाख्यातता धर्मे, मान्यते बुधसत्तमैः ॥ ८८० ॥ दुर्गे सूर्यपुरे स्थिते वधाना । धर्मे मयाऽत्र लिखिता सुरते खशुन्य-द्विप्रमाणशरदि प्रथितप्रमोदा (२०००) ॥ ८८१ ॥ ख्याता धर्ममयी सुपद्यरचना सद्धाद्विविधत्पूज्यप्रतापं जिनं, श्रीवीरं नवनिर्मितेऽत्र भवने ताम्रागमे स्थापितुं । ख्याता धर्ममयी सुपद्यरचना सद्भावना श्रेयसे, भव्यानां सुकृतादरान्वितहृदामानन्दसिन्धुप्रभा ॥ ८८२ ॥ इति श्री यतिधर्मोपदेशः ॥



॥४०॥
40

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust